प्रत्यंगिरापंचांग
खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई

अथ

प्रत्यंगिरापंचांगम्

प्रारभ्यते ।

संस्करण - जुलाई २००५, सम्वत् २०६२.

मूल्य : २५ रुपये मात्र।

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास™,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

श्रीगणेशाय नमः ॥ देव्युवाच ॥ मेरुपृष्ठे सुखासीनं भैरवं परमेश्वरम् ॥ प्रसन्नवदनं देवं नागयज्ञोपवीतिनम् ॥१॥ गजचर्मपरीधानं भूतिभूषणविग्रहम् ॥ कपालमालाभरणं गंगावीचिरवाकुलम् ॥ २ ॥ चंद्रार्द्धार्चितमूर्द्धानं सर्वकंकणनूपुरम् ॥ खट्वांगशूलपाशासिविभूषितकरांबुजम् ॥ ३ ॥ वामांकस्थितगौरीशं देवगंधर्वसेवितम् ॥ यक्षेंद्रकिन्नरनुतं ब्रह्माच्युतनमस्कृतम् ॥ ४ ॥ भैरव उवाच ॥ प्रहसंतं जयतं च ध्यायंतं च मुहुर्मुहुः ॥ स्मितपूर्वं प्रणम्यादौ बद्धांजलिपुटं ततः ॥ ५ ॥ उत्थाय पार्वती देवी

प्र० २

भगवंतमभाषत ॥ देव्युवाच ॥ भगवंस्त्वं परो देवस्त्रै लोक्यप्रभुरीश्वरः ॥ ६ ॥ त्रिगुणात्मा गुणातीतश्चि त्स्वरूपो निरंजनः ॥ सकलो निष्कलो देवः सत्ता रूपो महेश्वरः ॥ ७ ॥ त्वं किं जपसि देवेश ममाद्य विदितं तु यत् ॥ तत्समाचक्ष्व सकलं यद्यहं तव वल्लभा ॥ ८ ॥ भैरव उवाच ॥ एतद्गुह्यतमं लोके न कस्य कथितं मया ॥ तथापि तव देवेशि भक्त्या गुह्यं वदाम्यहम् ॥९॥ या देवी लोकमातेति महामा हेश्वरी शिवा ॥ प्रत्यंगिरेति विख्याता षड्विंशति सुवर्णिका ॥ १० ॥ सृजते सकलं विश्वं बिभर्ति

परमांबिका ॥ अंते सहायकर्त्रीं च संहरिष्यति तामसी ॥ ११ ॥ गुणत्रयमयी विद्या महादारिद्र्य वारिणी ॥ तस्याः पंचांगमीशानि पठाम्यहमह र्निशम् ॥ १२ ॥ जपे विद्यां सर्वमेतां वर्मनामसहस्र कम् ॥ स्तवं मंत्रमयं देवि पठामि परमेश्वरीम् ॥ ॥ १३ ॥ तत्प्रसादादहं देवि त्रैलोक्यप्रभुरीश्वरः ॥ भैरवो भैरवादेशः सृष्टिस्थितिलयात्मकः ॥ १४ ॥ देव्युवाच ॥ भगवन्देवदेवेश निःशेषकरुणाकर ॥ देव्याः प्रत्यंगिरायाश्च पंचांगं वक्तुमर्हसि ॥ १५ ॥ भैरव उवाच॥पटलं पद्धतिं चैव वर्मनामसहस्रकम्॥

प्र०
३

स्तोत्रं मंत्रमयं देवि वक्ष्ये लोकहितेच्छया ॥ १६ ॥
अत्रादौ पटलं दिव्यं मूलमंत्रमयं परम् ॥ सयंत्र
मंत्रसहितं प्रयोगसहितं शृणु ॥ १७ ॥ अथ मंत्रो
द्धारः ॥ प्रणवं वाग्भवं माया लक्ष्मीः प्रत्यंगिरेति
च ॥ मम रक्ष द्वयं देवि मम शत्रून पदं मयि ॥ १८ ॥
भक्षद्वयं प्रणवं च स्वाहांतो मंत्र उत्तमः ॥ एषा विद्या
मयाख्याता परमानंददायिनी ॥ १९ ॥ भोगदा
सुखदा देवि राज्यदा धनदा तथा ॥ सिद्धिमोक्ष
प्रदा विद्या परा सायुज्यदायिनी ॥ २० ॥ गुरुपा
दप्रसादेन श्रीविद्या यदि लभ्यते ॥ विना गुरुपदे

शेन नान्यत्सिद्ध्यति भारती ॥ २१ ॥ नैस्वांत रायो न क्लेशो न शौचनियमोऽपि वा ॥ साक्षात्सि- द्धिप्रदो देवि मंत्रोऽयं भोगमोक्षदः ॥ २२ ॥ वर्णलक्षं पुरश्चर्या तदर्द्धं वा महेश्वरि ॥ एकलक्षावधिं कुर्या न्नातो न्यूनं कदाचन ॥२३॥ जपाद्दशांशतो होम स्तद्दशांशेन तर्पणम् ॥ मार्जनं तद्दशांशेन तद्दशां- शेन भोजनम् ॥ २४ ॥ वटेऽरण्ये श्मशाने च शू- न्यागारे चतुष्पथे ॥ अर्धरात्रे च मध्याह्ने पुरश्च- रणमारभेत् ॥ २५ ॥ जीवहीनो यथा देहः सर्व कर्मसु न क्षमः ॥ पुरश्चरणहीनो यो न मंत्रः फल

प्र०
४

दायकः ॥ २६ ॥ मंत्रमुत्कालयेदादौ मंत्रं संजी वयेत्ततः॥ निष्कौटिल्यं चरेत्पश्चात्ततः शापहरीं जपेत् ॥ २७ ॥ सिद्धमंत्रं जपेच्छुद्धं ततः संपुटितं चरेत् ॥ क्रमेणानेन देवेशि श्रीविद्यां यो जपेत्सुधीः ॥२८॥ स साधको भवेल्लोके भोगी सायुज्यमाप्नुयात् ॥ मंत्रस्यास्य मुनिश्चैव महाभैरव एव च ॥ २९ ॥ अनुष्टुप् छंदइत्युक्तः श्रीमत्प्रत्यंगिरेति च ॥ देवतास्यापरा बीजं शक्तिः स्वाहा च कीलकम् ॥ ३० ॥ भोगापवर्गसिद्ध्यर्थं विनियोग इति स्मृतः ॥ ध्यानमस्याः प्रवक्ष्यामि सर्वतंत्रेषु

गोपितम् ॥ ३१ ॥ आशांबरा मुक्तकचा घनच्छ
विर्ध्येया सचर्मासिकराहिभूषणा ॥ दंष्ट्रोग्रवक्त्रा
ग्रसिता हिता त्वया प्रत्यंगिरा शंकरतेजसेरिता
॥ ३२ ॥ यंत्रोद्धारं प्रवक्ष्यामि सर्वसिद्धिप्रवर्तकम्
॥ सर्वसंमोहनं चक्रं सर्वाशापरिपूरकम् ॥ ३३ ॥
बिंदुत्रिकोणं वसुकोणयुक्तं वृत्ताष्टयंत्रं च त्रिवृत्तयु
क्तम् ॥ भूगेहलक्ष्मीखचितं च सिद्धिदं प्रात्यं
गिरं चक्रमेतन्मयोक्तम् ॥ ३४ ॥ लयांग
मस्य वक्ष्यामि यंत्रराजस्य पार्वति ॥ येन
श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥ ३५ ॥ इंद्रा

२

प्र०
९

द्या लोकपालाश्च ब्रह्मानंतांकिताः प्रिये ॥ वज्रा
दिहेतिसंयुक्ताः पूज्या भूगेहमंडले ॥ ३६ ॥ वाय
व्येशानपर्यंतं दिव्यसिद्धौघमाप्नुयात् ॥ गुरूंश्च
पूजयेद्देवि पंक्तित्रितयमध्यगान् ॥ ३७ ॥ ब्रह्माद्या
मातरः पूज्या भैरवाष्टकसंयुताः ॥ वामावर्तक्रमे
णैव रक्तपुष्पैर्विशेषतः ॥ ३८ ॥ स्तंभिनी मोहि
नी चैव क्षोभिणी द्राविणी तथा ॥ जृंभिणी
भ्रामिणी रौद्री तथा संहारिणीति च ॥ ३९ ॥ व
सुकोणे परा पूज्या महाचीनक्रमेच्छुभिः ॥ वामा
वर्तेन देवेशि परमार्थप्रदा सदा ॥ ४० ॥ काली च

भद्रकाली च नित्याकालीत्रिकोणगाः ॥ एताः सं
पूजनीयास्तु शिवाग्नीवामभागतः ॥ ४१ ॥ देवीं
रत्नमयीं पात्रे सौवर्णे पूजयेत्सुधीः ॥ लयांगमे
तदाख्यातं सर्वसिद्धिप्रदं शिवे ॥ ४२ ॥ प्रयोगा
नष्टवक्ष्येऽहं शृणुष्वावहिता प्रिये ॥ स्तंभनं मोहनं
चैव मारणाकर्षणे ततः ॥ ४३ ॥ वशीकरोच्चाटना
ख्ये शांतिकं पौष्टिकं ततः ॥ एतेषां साधनं वक्ष्ये
मंत्रसिद्धिप्रवर्त्तकम् ॥ ४४ ॥ येन श्रवणमात्रेण
मंत्रः कल्पद्रुमो भवेत् ॥ रवौ स्नात्वा जपेन्मूलं
वटमूलं महेश्वरि ॥ ४५ ॥ अयुतं तद्दशांशेन हुने

प्र० ६

दाज्यं सितां शटीम् ॥ गोधूममधुनालोड्यं स्तंभ येद्वादिनां रसान् ॥ ४६ ॥ जलसूर्येंदुवातानां ग तिरेषां च कामिनाम् ॥ अश्वत्थस्य तले जप्त्वा मू लविद्यां यथाविधि ॥ ४७ ॥ अयुतं तद्दशांशेन जु हुयात्सर्पिरेणजम् ॥ मांसं कणाशटीमिश्रं मोह नं जगतां भवेत् ॥४८॥ कुजे वा शनिवारे वा पि त्र्यर्क्षे विष्टिसंगमे ॥ गत्वा श्मशानं देवेशि नत्वा दिग्भूतभैरवान् ॥ ४९ ॥ चितां संपूज्य वीरेशे ज पेदयुतसंख्यया ॥ चिताग्नौ जुहुयादाज्यं गुरुपु ष्ये शतावरीम् ॥ ५० ॥ चंडालकेशनखरदंतामि

श्रां च साधकः ॥ तर्प्पयेत्तद्दशांशेन भोजयेत्पा
त्रपूर्वकम् ॥ ५१ ॥ शत्रुर्मृत्युसमानोऽपि मृत्युमा
याति नान्यथा ॥ करेरिमूले गिरिजे जपेन्मूलं शि
वेऽयुतम् ॥५२॥ हुनेदाज्यं वचां शुंठीं वानर्यातिब
लासमम् ॥ मेनका पीनवक्षोजा स्वस्थाभ्याक
र्षिता भवेत् ॥ ५३ ॥ वानीरमूले देवेशि जपेदयुत
संख्यया ॥ हुनेदाज्यं ह्यरद्यूतं नागवल्लीदलांकि
तम् ॥ ५४ ॥ भूबिंबं तर्पयेद्देवीं दशांशेनैव साध
कः ॥ शक्रोऽपि दासतां याति किंपुनः क्षुद्रमानुषः
॥ ५५ ॥ क्रुरक्षे क्रूरवेलायां जपेत्प्रेतालये मनुम् ॥

अयुतं तु चितावह्नौ हुनेत्सर्पिःकणौषणान् ॥ ५६ ॥
जातीफलं पलं मैषं खररोमाणि पार्वति ॥ रिपूणा
सहसा देवि भवेदुच्चाटनं परम् ॥ ५७ ॥ नदीकू
ले जपेन्मंत्रमयुतं साधकोत्तमम् ॥ तद्दशांशं हुने
दाज्यं समृद्धीकं सपायसम् ॥ ५८ ॥ कनकं ता
गरं रात्रौ तर्पयेत्तद्दशांशतः ॥ अतिवृष्टेरनावृष्टे
र्मारीभीतेर्महेश्वरि ॥ ५९ ॥ राजभीतेर्महाव्या
घ्रात्सद्यःशांतिः प्रजायते ॥ महापर्वदिने देवि यत्र
तत्र जपेन्मनुम् ॥ ६० ॥ अयुतं तद्दशांशेन जु
हुयादाज्यपायसम् ॥ शैलं सिंदूरमिश्रं च सपलं

सलवंगकम् ॥ ६१ ॥ ऐणं मांसं शरं मीनं सालं च सकुलत्थकम् ॥ सासवंशुकसद्धीतरजोवत्यंबरान्वितम् ॥ ६२ ॥ हुत्वा च तर्पयित्वा च भोजयित्वा च साधकान् ॥ पितॄणां देवतानां च ऋषीणां कुलिनां प्रिये ॥ ६३ ॥ दिव्यकल्पायुतं देवि महापुष्टिः प्रजायते ॥ सर्वथा सर्वदा नित्यं महाविद्यां जपेत्सुधीः ॥ ६४ ॥ दशांशं होमयेत्तत्र तर्प्पयेत्तद्दशांशतः ॥ भोजयेत्तद्दशांशेन मंत्री किं किं न साधयेत् ॥ ६५ ॥ मूर्खो वागीशतां याति निर्धनो धनवान्भवेत् ॥ महादारिद्र्ययुक्तोऽपि भवेद्वैश्रवणोपमः ॥ ६६ ॥ इह

लोके भवेद्योगी परत्र त्रिदिवं भजेत् ॥ इतीदं मंत्र सर्वस्वं प्रत्यंगिरारहस्यकम् ॥६७॥ पटलं गुह्यमी शानि गोपनीयं स्वयोनिवत् ॥६८॥ इति श्रीरुद्रया मले तंत्रे पंचांगखंडेदशविद्यारहस्ये प्रत्यंगिरापटलं समाप्तम् ॥ ॥ अथ ब्राह्मे मुहूर्त्ते शयनतलादुत्थाय करचरणौ प्रक्षाल्य निजासने समुपविश्य निज शिरसि श्वेतवर्णसहस्रदलकमलकर्णिकांतर्गतचन्द्र मण्डलोपरि स्वगुरुं शुक्लवर्णं शुक्लालंकारभूषितम् ॥ ज्ञानानन्दमुदितमानसं सच्चिदानन्दविग्रहम् ॥ चतु र्भुजं ज्ञानमुद्रापुस्तकवरदाभयकरं त्रिनयनं प्रसन्न

वदनेक्षणम् ॥ सर्वदेवं वामांगे वामहस्तधृतकमलया रक्तवसनाभरणया स्वप्रियया दक्षिणभुजेनालिंगितं परमशिवस्वरूपं ध्यात्वा ॥ तच्चरणयुगलकमलविग लदमृतधारया स्वात्मानं प्लुतं विभाव्य ॥ मान सोपचारैराराध्य ॐ ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवर यऊंसहसखफ्रेंसहक्षमलवरयहुंह्सौं ॥ ह्सौः श्रीमच्छ्री अमुकानन्दनाथ श्रीपादुकां पूजयामि नमः ॥ इति दशधा विमृश्य दंडप्रणामं मनसा कुर्यात् ॥ तत्र प्रणाममंत्रा यथा ॥ नमामि सद्गुरुं शांतं प्रत्यक्षं शिवरूपिणम् ॥ शिरसा योगपीठस्थं मुक्तिकामार्थं

प्र०
९

सिद्धये ॥ श्रीगुरुं परमानन्दं वंदे आनन्दविग्रहम् ॥
यस्य सान्निध्यमात्रेण चिदानंदायते परम् ॥ अज्ञा
नतिमिरांधस्य ज्ञानांजनशलाकया ॥ चक्षुरुन्मी
लितं येन तस्मै श्रीगुरवे नमः ॥ गुरुर्ब्रह्मा गुरुर्विष्णु
र्गुरुः साक्षान्महेश्वरः॥गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे
नमः ॥ इति प्रणाममन्त्रान्पठित्वाऽन्यांश्च पठेत् ॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ॥ वि
द्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रहः ॥ नवाय नव
रूपाय परमार्थैकरूपिणे ॥ सर्वाज्ञानतमोभेदभानवे
चिद्घनाय ते ॥ स्वतन्त्राय दयाक्लृप्तविग्रहाय परा

त्मने ॥ परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥
ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम् ॥
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥ पुर
स्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ॥ सदा
मच्चित्तरूपेण विधेहि भवदासनम् ॥ इति गुरुं प्रणम्य॥
सुप्रसन्नं विभाव्य मनसा तदाज्ञां गृहीत्वा ॥ मूला
धारे स्वर्णचतुर्दलकमलकर्णिकांतर्गतत्रिकोणचक्र
शृंगाटकोपरि परां शक्तिं कुण्डलिनीमुद्यद्दिनकर
सहस्रभास्वरां विद्युत्कोटिसन्निभाम् ॥ सकलमन्त्र
मातरं सर्वप्राणिजीवात्रिधमधामानम् ॥ सर्पाकारा

मूर्ध्वमुखीं सार्धत्रिवलयाम् ॥ बिसतंतुतनीयसीं सुप्तां विभाव्य ॥ गुरूपदिष्टनिजसहजनादेन बोधयित्वा ॥ तत्र ॥ वंनमः ॥ शंनमः ॥ षं नमः ॥ सं नमः ॥ इति पत्रेषु मध्ये मूलेन च प्रादक्षिण्येन संपूज्य हंस इति मन्त्रेणासर्वतः संस्थाप्य ॥ ततो विद्रुमवर्णे षड्दले स्वाधिष्ठाने लिंगमूले तां नीत्वा ॥ तत्र॥बं नमः॥भं नमः॥मं नमः॥यं नमः ॥ रं नमः॥ लं नमः ॥ इति पत्रेषु मध्ये मूलेन च संपूज्य ॥ ततो मणिपूरके ॥ नाभौ नीलवर्णे दशदलकमले तां नीत्वा ॥ तत्र ॥ डं नमः ॥ ढं नमः ॥ णं नमः ॥

तं नमः ॥ थं नमः ॥ दं नमः ॥ धं नमः ॥ नं नमः ॥ पं नमः ॥ फं नमः ॥ इति पत्रेषु मध्ये मूलेन च प्रपूज्य ॥ ततो वक्षस्यनाहते पिंगलवर्णे द्वादश दलकमले तां नीत्वा ॥ ॥ तत्र ॥ कं नमः ॥ खं नमः ॥ गं नमः ॥ घं नमः ॥ ङं नमः ॥ चं नमः ॥ छं नमः॥जं नमः ॥ झं नमः ॥ ञं नमः ॥ टं नमः ॥ ठं नमः ॥ इति पत्रेषु मध्ये मूलेन च संपूज्य ॥ तेजोविशुद्धौ ॥ कंठे धूम्रवर्णे षोडशदलकमले तां नीत्वा ॥ तत्र ॥ अं नमः ॥ आं नमः ॥ इं नमः ॥ ईं नमः॥उं नमः॥ ऊं नमः॥ ऋं नमः॥ॠं नमः॥ऌं

प्र० नमः ॥ ॡं नमः ॥ एं नमः ॥ ऐं नमः ॥ ओं नमः ॥
११ औं नमः ॥ अं नमः ॥ अः नमः ॥ इति पत्रेषु
मध्ये मूलेन संपूज्य ॥ ततः सहस्रदलकमलकर्णि
कान्तर्गतबिंदुरूपतेजोमयपरमशिवेन सहैकतां
नीत्वा ॥ तेनामृतेन ततः स्रवता संतर्प्य
तत्र नादश्रवणतत्परो मुहूर्तं लयं विभाव्य ॥
पुनरपि तथैवाज्ञाचक्रादिक्रमेण तेषु तेषु कमलेषु
तैस्तैरक्षरैः संपूज्य ॥ अवरोहेमि मंत्रेण कमलात्क
मलमपरोह्य ॥ पुनरपि मूलाधारे ॥ स्वस्थाने स्थाप
येदित्यारोहावरोहक्रमेण॥परां देवींकुण्डलिनीं ध्या

त्वा ॥ प्राणायाममृष्यादिकरषडंगन्यासध्यानानि वक्ष्यमाणक्रमेण कृत्वा ॥ यथाशक्ति जपं विधाय ॥ पुनरपि ॥ प्राणायामादिना जपं समर्प्य ॥ नित्यकृत्यं समर्पयेत् ॥ प्रातःप्रभृति सायांतं सायादिप्रातरंततः ॥ यत्करोमि जगद्योने तदस्तु तव पूजनम्॥ इति समर्प्य स्वकार्यानुष्ठानाय ॥ त्रैलोक्यचैतन्यमये सुरेशि प्रत्यंगिरे त्वच्चरणाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीपरमेशि देवि ॥ स्पर्धातिरस्कारकलिप्रमादभयानि मां माभिभवंतुमातः॥

प्र०
१२

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ॥ त्वया हृषीकेश हृदिस्थयाहं यथा नियुक्तोऽस्मि तथा चरामि ॥ इति देव्याज्ञां प्रार्थ्य ॥ अजपाजपं सहजसिद्धं तत्तद्देवताभ्यः संकल्पं समर्पयेत ॥ ओं अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपमहं करिष्ये ॥ इति संकल्प्य समर्प्पयेत्॥ ओंऐंह्रींश्रीं मूलाधारचक्रस्थाय गणपतये अजपाजपानां षट्शतं ६०० समर्प्पयामि नमः ॥ ओंऐंह्रींश्रीं स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अजपाजपानां

षट्सहस्राणि ६००० समर्प्पयामि नमः ॥ ओंऐंह्रीं श्रींमणिपूरचक्रस्थाय विष्णवे अजपाजपानां षट्सहस्राणि ६००० समर्प्पयामि नमः ॥ ॐ ऐंह्रींश्रीं अनाहतचक्रस्थाय रुद्राय अजपाजपानां षट्सहस्राणि ६००० समर्प्पयामि नमः ॥ ॐ ऐंह्रींश्रींविशुद्ध चक्रस्थाय जीवात्मने अजपाजपानां सहस्रं १००० समर्प्पयामि नमः ॥ ॐ ऐंह्रींश्रीं आज्ञाचक्रस्थाय परमात्मने अजपाजपानां सहस्रम् १०००समर्प्पयामि नमः ॥ॐ ऐंह्रींश्रींसहस्रदलकमलकर्णिकामध्यस्थाय श्रीगुरुपादुकायै अजपाजपानां सहस्रं समर्प्प

प्र०
१३

यामि नमः ॥ इत्यजपाजपं समर्प्य ॥ अजपामं
त्रेण प्राणायामं कृत्वा ॥ हंसात्मने ऋषये नमः
शिरसि ॥ अव्यक्तगायत्रीछंदसे नमः मुखे ॥
परमहंसाय देवतायै नमः ॥ हृदये ॥ ॐ ऐं
ह्रीं श्रीं हं बीजाय नमः मूलाधारे ॥ ॐ ए ह्रीं श्रीं
सः शक्तये नमः पादयोः ॥ ॐ ऐं ह्रीं श्रीं सोहं की
लकाय नमः नाभौ ॥ ॐ ऐं ह्रीं श्रीं ओंकारतत्वाय
नमः हृदये ॥ ॐ ऐं ह्रीं श्रीं उदात्तस्वराय नमः कंठे
॥ ॐ ऐं ह्रीं श्रीं नभसे स्थानाय नमः मूर्ध्नि ॥ ॐ
ऐंह्रींश्रींहैमाय वर्णाय नमः सर्वांगे ॥ इति विन्य

स्य ॥ मम मोक्षार्थे जपे विनियोगः ॥ इति कृतां
जलिर्विदेत् ॥ ततः ॐ ए ह्रीं श्रीं ह्रूसां सूर्यात्मने स्वा
हा अंगुष्ठाभ्यां नमः॥ ॐ ऐं ह्रीं श्रीं ह्रूसीं सोमात्मने
स्वाहा तर्जनीभ्यां नमः ॥ ॐ ऐं ह्रीं श्रीं ह्रूसूं निरं
जनात्मने स्वाहा मध्यमाभ्यां नमः ॥ ॐ ऐं ह्रीं
श्रीं ह्रूसौं निराभासात्मने स्वाहा अनामिकाभ्यां न
मः॥ॐ ऐं ह्रीं श्रीं ह्रूसौं कनिष्ठतनुः सूक्ष्मा देवी प्रचो
दयात्स्वाहा ॥ कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं
श्रीं ह्रूसः ॥ अव्यक्तबोधात्मने स्वाहा करतलकरपृ
ष्ठाभ्यां नमः ॥ इति करन्यासः ॥ अथ षडंग

प्र०
१४

न्यासः ॥ ॐ ऐं ह्रीं श्रीं ह्रसां सूर्यात्मने स्वाहा हृद
याय नमः ॥ ॐ ऐं ह्रीं श्रीं ह्रसीं सोमात्मने स्वाहा
शिरसे स्वाहा॥ॐ ऐं ह्रीं श्रीं ह्रसूं निरंजनात्मने स्वाहा
शिखायै वषट् ॥ ॐ ऐं ह्रीं श्रीं हसैं निराभासात्मने
स्वाहा कवचाय हुं॥ ॐ ऐं ह्रीं श्रीं ह्रसौं कनिष्ठतनुः
सूक्ष्मा देवी प्रचोदयात्स्वाहा नेत्रत्रयाय वौषट् ॥
ॐऐं ह्रीं श्रीं ह्रसःअव्यक्तबोधात्मने स्वाहा अस्त्राय
फट्॥इति करयोर्विन्यस्य ॥ हृद्यप्येतानेव मंत्रान्वि
न्यस्य ध्यानं कुर्यात् ॥ द्यां मूर्धानं यस्य विप्रा
वदंति खंवै नाभिं चंद्रसूर्यौ च नेत्रे ॥ दिग्भिः श्रो

त्रे यस्य पादौ क्षितिश्च ध्यातव्योऽसौ सर्वभूतां
तरात्मा ॥ इति विराट्स्वरूपं स्वात्मानं ध्यात्वा ॥
तदनुसंधायिप्राणवायोर्निर्गमप्रवेशात्मकमजपामंत्र
म् ॥ हंसः ॥ पंचविंशतिवारं जप्त्वा समर्प्य ॥ गुरू
पदिष्टमार्गेण नादानुसंधानपूर्वकं निरस्तसमस्तो
पाधिना ॥ केनापि चिद्विलासेन प्रवर्तमानोऽस्मीति
विभाव्य स्वकार्य्यानुष्ठानाय ॥ समुद्रमेखले देवि
पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं
क्षमस्व मे ॥ इति भूमिं प्रार्थ्य श्वासानुसारेण
तस्यां पादं निधाय ॥ नद्यादौ गत्वा वैदिकं स्नानं

निर्वर्त्य ॥ तांत्रिकमारभेत ॥ तत्रादौ ॥ मूलम् आ
त्मतत्त्वाय स्वाहा ॥ मूलविद्यातत्त्वाय स्वाहा ॥
मूलशिवतत्त्वाय स्वाहा ॥ अथवा ॐ ह्रीं स्वाहा ॥
इत्याचम्य मूलं स्मरन् ॥ मलापकर्षणस्नानं विधाय
पुनराचम्य॥ॐअद्यामुकमासस्यामुकपक्षस्य तिथाव
मुकायाम् अ०क्षेत्रे अमुकशर्माहं श्रीकुलदेवताप्रीतये
तांत्रिकविधिना स्नानमहं करिष्ये इति संकल्पं कृ
त्वा ॥ जले त्रिकोणचक्रं विलिख्य ॥ सूर्यमंडला
त् ॥ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे
सिंधुकावेरिजलेऽस्मिन्सन्निधिं कुरु ॥ इति अंकु

शमुद्रया तीर्थमावाह्य ॥ पुरःकल्पिततीर्थे संयोज्य॥
आचम्य ॥ स्वात्मानं प्रोक्ष्य मूलेन मृत्तिकया स्न
पनं विधाय ॥ मूलं पठन्॥ कुंभमुद्रया हितां स्वदेवतां
त्रिभिरभिषिच्य ॥ श्रवणादिसप्तच्छिद्राणि निरुध्य॥
त्रिर्निमज्ज्योन्मज्जेत् ॥ इति स्नानविधिः ॥ अथ
संध्या॥ पूर्ववदाचम्य स्वमूलप्राणायामः ॥ ऋष्यादि
करषडंगं विधाय ॥ पूर्ववत्तीर्थमावाह्य ॥ वामहस्ते
तज्जलं निधाय ॥ दक्षहस्तेनाच्छाद्य ॥ लं वं रं यं
हं ॥ इति त्रिरभिमंत्र्य मूलमुच्चरंस्तत्त्वमुद्रया ॥
मूर्ध्नि सप्तधा मूलेन च त्रिधाभ्युक्ष्य ॥ शेषजलं दक्ष

प्र०
१६

हस्ते समाधाय तेजोरूपं ध्यात्वा इडया देहांतःपापं प्रक्षाल्य ॥ कृष्णवर्णं तज्जलं पापरूपं पिंगलयाविरच्य॥पुरःकल्पितवज्रशिलायां फडिति निक्षिपेत ॥ ततोऽर्घ्यं विधाय ॥ ओंह्रांह्रींहंसः श्रीमार्तंडभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं परिकल्पयामि स्वाहा ॥ इति त्रिरर्घ्यं कुलसूर्य्याय दत्त्वा ॥ हृत्पद्मात्सूर्यमण्डले मूलदेवीं नीत्वा तत्र विधिवद्ध्यात्वा ॥ ॐप्रत्यंगिरायै विद्महे शत्रुनिषूदिन्यै धीमहि॥तन्नो देवी प्रचोदयात ॥ इति मूलगायत्री ॥ अनया चतसृषु संध्यासु सूर्यमण्डले मूलदेव्यै ॥ अर्घ्यं

दत्त्वा ॥ यथाशक्ति जपेत् । चतसृषु सन्ध्या सु क्रमशो मूलाधारहृत्कमलभ्रूमध्यब्रह्मरंध्रेभ्यो देवीतेजः समाकृष्य ॥ इडया विरेच्य कलितवह्नि सूर्यचन्द्रतारामण्डलेषु निक्षिप्य॥ततःदेवीं ध्यात्वा॥ स्वस्वगायत्र्यार्घ्यं दत्त्वा॥ यथाशक्ति स्वस्वगायत्रीं जप्त्वा ॥ पुनर्मूलगायत्रीं च जप्त्वा ॥ स्वस्वबीजा क्षरं सर्वं मूलं च जपित्वा ॥ प्राणायामादिना जपं समर्प्य मण्डलेभ्यो देवीतेजः ॥ स्वस्वस्थाने देवीं च हृदि आनीय ध्यायेदिति संध्याविधिः ॥ ततस्त र्पणम् ॥ पूर्ववदाचम्य प्राणायामादि कृत्वा ॥ तीर्थ

मावाह्य॥मूलेन जलं सप्तधाऽमृतमुद्रयाऽमृतीकृत्य॥
तत्र जले यंत्रं ध्यात्वा॥तत्र देवीं हृदयात्सपरिवारामा
नीय षडंगयोगेन संकलीकृत्य ॥ कुण्डलिन्याः प्रयो
गेनामृतेनाभिषिच्य॥विधिवत्संपूज्य ॥ऐशान्याम् ॥
ऐंश्रींश्रीअमुकानन्दनाथभैरवस्तृप्यतामिति त्रिः
संतर्प्य ॥ वह्नौ परमगुरुश्रीपादुकां तर्पयामि ॥
नैर्ऋत्यां परमाचार्यगुरुश्रीपादुकां तर्प्पयामि ॥
वायव्ये ॥ परमेष्ठिगुरुश्रीपादुकां तर्प्पयामि इति
त्रिः सकृद्वा संतर्प्य ॥ दिव्यसिद्धमानवौघानपि
गुरून्संतर्प्य ॥ जले यंत्रं विभाव्य ॥ मूलभैरवसहिते

प्रत्यंगिरे तृप्यतामिति त्रिः संतर्प्य ॥ परिवारानपि संतर्प्य ॥ प्राणायामादि विधाय ॥ देवीं स्वहृदि विसृजेदिति ॥ तीर्थं च विसृजेत्स्वस्थाने इति तर्प्पणम् ॥ ततो गृहमागत्य ॥ जलादिना द्वारदेवताः पूजयेत् ॥ ॐ धात्र्यैनमः ॥ विं विधात्र्यै नमः दक्षे ॥ गं गंगायै नमः ॥ यं यमुनायै नमः वामे ॥ द्वारश्रियै नमः ॥ देहल्यै नमः ऊर्ध्वे ॥ वास्तुपुरुषाय नमः ॥ अधः ॥ इति संपूज्य ॥ विरोधासनेनोपविश्य ॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ इति पृथ्वीं

प्राथ्य ॥ संविदं यथामंत्रं स्वीकुर्यात् ॥ तद्विधि
यथा ॥ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ॥ ब्राह्म
णानां च तृप्त्यर्थं पवित्रा भव सर्वदा ॥ ॐब्राह्मण्यै
नमः स्वाहा ॥ सिद्धिमूलक्षये देवि हीनबोधप्रबोधि
नि ॥ राजाप्रजावशंकरि शत्रुपक्षनिषूदिनि॥ ऐं क्षत्रि
यायै नमः स्वाहा ॥ अज्ञानेंधनदीप्ताग्नौ ज्ञानाग्नि
ब्रह्मरूपिणी ॥ आनंदस्याहुतिं प्रीतिं सम्यग्ज्ञानं
प्रयच्छ मे ॥ ह्रीं वैश्यायै नमः स्वाहा ॥ नम
स्यामि नमस्यामि योगमार्गप्रदर्शिनि ॥ त्रैलो
क्यविजये मातः समाधिफलदा भव ॥ क्लींशूद्रायै

नमः स्वाहा ॥ इति अभिमंत्र्य ॥ ॐ अमृते अमृतो
द्भवे अमृतवर्षिणि अमृतमाकर्षयाकर्षय सिद्धिं दे
हि देहि ॥ अमुकपदंमेवशमानय स्वाहेतितदुपरि स
प्तधामूलं च जप्त्वा ॥ धेनुमुद्रयामृतीकृत्यावाहना
दिमुद्राः संदर्श्य ॥ छोटिकाभिर्दिग्बंधं विधाय ॥ ऐं
वदवदवाग्वादिनी मम जिह्वाग्रे स्थिरीभव ॥ सर्वस
त्ववशंकरी स्वाहा ॥ इत्यनेन मुखे जुहुयात् ॥ तत
आनंदमयो भूत्वा ॥ अपसर्पंतु ते भूता ये भूता भुवि
संस्थिताः॥ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया
॥ पाखंडकारिणो भूत्वा भूता भूम्यंतरिक्षगाः ॥

प्र० दिवि लोके स्थिता ये च ते नश्यंतु शिवाज्ञया ॥
१९ इति तर्ज्जनीमध्यमाभ्यामूर्ध्वोर्ध्वतालत्रयदानेन
वामपार्ष्णिघातत्रयेण दिव्यदृष्ट्या च त्रिविधान्विघ्ना
नुत्सार्य्य ॥ छोटिकाभिर्दशदिग्बंधं कृत्वा ॥ चतुर्दि
क्षु वह्निप्राकारं संचिंत्य प्राणायामं कुर्यात् ॥ तत्र
प्रणवं षोडशवारमुच्चरन् ॥ दक्षांगुष्ठेन दक्षनासापुटं
निरुद्ध्य वामेन पवनं पूरयेत॥ ततस्तमेव चतुष्षष्टि
वारमुच्चरन् ॥ दक्षानामाकनिष्ठाभ्यां वामं पुटं च
निरुध्य ॥ द्वाभ्यां पवनं कुंभयेत् ॥ ततस्तमेव द्वा
त्रिंशद्वारमुच्चरन् ॥ वामं पुटं तथैव निरुध्य ॥ दक्षेण

पवनं रेचयेदित्येकः प्राणायामः ॥ एष एव विपर्य येण द्वितीयः ॥ प्रथमवत्तृतीयः ॥ इत्थं प्राणायामेन निरस्तसकलकलुषं स्वदेहं देवताराधनयोग्यं विभाव्य भूतशुद्धिं कुर्यात् ॥ अथ मूलाधारे हंस इति मंत्रेण कुंडलिनीं पृथ्व्या सह स्वाधिष्ठाने आनीय ॥ तत्र जले पृथ्वीं लीनां विभाव्य । तस्माज्जलेन सह मणिपूरे समानीय तत्र वह्नौ जलं लीनं विचिंत्य ॥ तस्माद्वह्निना सहानाहते समानीय तत्र वायौ वह्निं लीनं विचिंत्य ॥ तस्माद्वायुना सह विशुद्धे समानीय ॥ तत्रस्थाकाशे वायुं लीनं

प्र० २०

विचिंत्य ॥ तस्मादाकाशेन सह आज्ञाचक्रे समानी
य ॥ तत्रस्थंमनस्याकाशं लीनं संचिंत्य मनोना
दे लीनं विभाव्य ॥ ध्वनौ ध्वनिं समर्प्य ॥ सहस्र
दलकमलकर्णिकांतस्थचंद्रमंडलमध्यगतत्रिकोणां
तर्गततेजोमयबिंदुरूपपरमशिवे तं समर्प्य ॥ प्राणा
यामविधिना यमिति वायुबीजं धूम्रवर्णं षोडशधा
जपन् ॥ शरीरे वामकुक्षिस्थितं पापपुरुषं कज्जल
प्रभम् ॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम् ॥ तत्संसर्ग
पदद्वंद्वमंगप्रत्यंगपातकम् ॥ उपपातकरोमाणं रक्त

श्मश्रुविलोचनम् ॥ खड्गचर्मधरं क्रुद्धं पुण्यं पाप
विचिन्त्य तम् ॥ संशोष्यरमिति वह्निबीजं रक्तवर्ण
चतुष्षष्टिवारं जपंस्तमेव संदह्य रमिति सुधाबीजं
शुक्लवर्णं सहस्रारे विचिंत्य ॥ द्वात्रिंशद्वारं जपेस्तज्ज
वामृतवृष्ट्या निष्पापं शरीरमुत्पाद्य ॥ ललाटस्थल
मिति पृथ्वीबीजेन पीतवर्णेन षोडशधा जप्तेन सुदृढी
कृत्य ह्रीमिति षोडशधा जप्तेन मूलस्थेन साकाश
शक्तिबीजेनऐश्वर्यं देहं विधाय ॥ सोहमिति मंत्रेण
कुण्डलिनीममृतलोलीभूतां ॥ पंचभूतानि जीवात्मा
नं ब्रह्मपथेन स्वस्वस्थाने नियोजयत ॥ ततो देवी

२० रूपमात्मानं विचिंत्य॥हृदि दक्षहस्तं निधाय॥प्राण
२१ प्रतिष्ठां कुर्यात्॥ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंलंक्षंहूसौं
हंसःश्रीप्रत्यंगिरायाः प्राणा इह प्राणाः॥ ॐ आंह्रीं
क्रौंयंरंलंवंशंपंसंहंलंक्षंहूसौंश्रीप्रत्यंगिरायाः जीव इह
स्थितः॥ॐआंह्रींक्रौंयंरंलंवंशंषंसंहंळंक्षं हूसौंहंसःसर्वे
द्रियाणि इह स्थितानि ॐ आंह्रींक्रौंयंरंलंवंशंषंसंहं
लंक्षंहूसौं हं सः॥वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणा
इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥इति प्राणप्रतिष्ठां
विधाय॥ स्वमूलऋष्यादिस्मरणं विदधीत तद्यथा॥
अस्य श्रीप्रत्यंगिरामहामंत्रस्य भैरवऋषिः॥ अनु

ष्टुपूछंदः॥श्रीप्रत्यंगिरा देवता॥ ह्रींबीजं॥ श्रींशक्तिः
स्वाहा कीलकम् विद्यासिद्ध्यर्थे जपे विनियोगः॥
इति कृतांजलिः स्मृत्वा॥ यथाविधि न्यसेत॥ भैर
वऋषये नमः शिरसि॥ अनुष्टुपूछंदसे नमः मुखे
॥ श्रीप्रत्यंगिरादेवतायै नमः हृदि॥ ह्रीं बीजाय
नमःगुह्ये॥ श्रीं शक्तये नमः पादयोः॥ स्वाहाकील
काय नमः नाभौ॥ मम श्रीधर्मार्थकाममोक्षार्थे जपे
विनियोगः॥ सर्वांगे॥ इति ऋष्यादिस्मरणम्॥ ऐं
नमः नाभ्यादिपादांतं ह्रां नमः कंठादिनाभ्यंतम्॥
श्रीं नमः मूर्धादिकंठांतम्॥ ऐं नमः वामपाणितले

प्र०
२२

॥ ह्रीं नमः दक्षिणपाणितले॥श्रां नमः उभयोः ॥ अथ स्वमूलकरन्यासः ॥ ॐ ऐं अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ श्रीं मध्यमाभ्यां नमः ॥ प्रत्यंगिरे अनामिकाभ्यां नमः मम रक्ष रक्ष कनिष्ठिकाभ्यां नमः॥मम शत्रूणां भक्ष भक्ष ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ अथ षडंगन्यासः॥ॐ ए हृदयाय नमः ॥ ह्रीं शिरसे स्वाहा ॥श्रीं शिखायै वषट् ॥ प्रत्यंगिरे कवचाय हुम् ॥ मम रक्ष रक्ष नेत्रत्रयाय वौषट् ॥ मम शत्रूणां भक्ष भक्ष ॐ स्वाहा अस्त्राय फट् इति षडंगन्यासः॥अथ

मातृकान्यासः ॥ ॐ अस्य श्रीअंतर्मातृकान्यासस्य
ब्रह्मा ऋषिः गायत्रं छंदः श्रीमातृकासरस्वती देव
ता ॥ हलो बीजानि ॥ स्वराः शक्तयः ॥ अव्यक्तं
कीलकम् ॥ मम श्रीप्रत्यंगिरात्वेन न्यासे वि
नियोगः ॥ इति प्रांजलिः स्मृत्वा न्यसेत् ॥
ब्रह्मऋषये नमः शिरसि॥गायत्रीछंदसे नमः मुखे ॥
श्रीअंतर्मातृकादेवतायै नमः हृदये॥हलो बीजेभ्यो
नमः गुह्ये ॥ स्वराः शक्तिभ्यो नमः पादयोः ॥ अ
व्यक्तं कीलकाय नमः नाभौ ॥ मम श्रीप्रत्यंगिरा
त्वेन न्यासे विनियोगः इति सर्वांगे ॥अथ मातृका

प्र०
२३

करन्यासः ॥ ॐ एह्रीं श्रींअंकंखंगंघंङं आं अंगुष्ठा भ्यां नमः ॥ ॐ ऐंह्रींश्रींइंचंछंजंझंञंईतर्जनीभ्यां नमः॥ॐ एह्रीं श्रीं उंटंठंडंढंणंऊं मध्यमाभ्यां नमः॥ॐ ऐंह्रींश्रींएंतंथंदंधंनंऐं अनामिकाभ्यां नमः॥ ॐऐंह्रीं श्रींओंपंफंबंभंमं औं कनिष्ठिकाभ्यां नमः ॐऐंह्रींश्रीं अंयंरंलंवंशंषंसंहंलंक्षं ॥ अःकरतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ अथ षडंगन्यासः ॥ ॐ ऐंह्रीं श्रींअंखंगंघंङंआं हृदयाय नमः ॥ ॐ ऐंह्रींश्रींइंचंछं जंझंञंई शिरसे स्वाहा ॐ ऐंह्रींश्रींउंटंठंडंढंणंऊं शिखायै वषट् ॥ ॐ ऐंह्रींश्रींएंतंथंदंधंनंऐं कवचाय हुं

॥ ॐ ऐंह्रींश्रींओंपंफंबंभंमंऔं नेत्रत्रयाय वौषट् ॐ ऐंह्रींश्रींअंयंरंलंवंशंषंसंहंलंक्षंअः अस्त्रायफट् इति करयोरंगुष्ठादितलांतं विन्यस्य ॥ हृदयादिषडंगेष्वपि न्यसेत ॥ ततोऽतर्मातृकान्यासः ॥ अं नमः आं नमः इंनम ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अःनमः इति कंठे षोडशादले॥कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठंनमः इत्यनाहते द्वादशदले ॥डंनमःढंनमः णंनमः तंनमः थंनमः दंनमः धंनमः

नंनमः पंनमः फंनमः इति नाभौ दशदले ॥ बंनमः भंनमः मंनमः यंनमः रंनमः लंनमः इति लिंगमूले षट्दले॥ वंनमः शंनमः षंनमःसंनमः इति मूलाधारे चतुर्दले॥ हंनमः क्षंनमः इति भ्रूमध्ये द्विदले ॥ इत्यंतर्मातृकावदेव॥ न्यासस्तु ॐ ऐंह्रींश्रींअंनमः शिरसि ॥ ॐ ऐंह्रींश्रींआं नमः मुखवृत्ते ॥ ॐऐंह्रीं श्रींइं नमः दक्षनेत्रे॥ ॐ ऐंह्रींश्रींईं नमः वामनेत्रे ॥ ॐ ऐंह्रीं श्रींउं नमः दक्षकर्णे ॥ ॐ ऐंह्रीं श्रींऊं नमः वामकर्णे ॥ ॐ ऐंह्री श्रींऋं नमः दक्षनासे ॥ ॐ ऐंह्रीं श्रींॠं नमः वामनासे ॥ ॐ

ऐं ह्रीं श्रीं लृं नमः दक्षगंडे ॥ ॐ ऐंह्रींश्रींलॄं नमः वामगंडे ॥ ॐ ऐं ह्रीं श्रीं एं नमः ऊर्ध्वोष्ठे ॥ ॐ ऐंह्रीं श्रीऐं नमः अधरोष्ठे ॥ ॐ ऐंह्रीं श्रीं ओंनमः ऊर्ध्वदंतपंक्तौ ॥ ॐ ऐंह्रीं श्रींऔं नमः अधोदंतपंक्तौ॥ॐऐंह्रीं श्रींअं नमः मूर्ध्नि ॥ ॐ ऐंह्रीं श्रींअः नमः अस्थिन॥ॐऐंह्रीं श्रींकं नमः दक्षबाहुमूले ॥ ॐ ऐं ह्रीं श्रीं खं नमः कूर्परे ॥ ॐऐंह्रीं श्रीं गं नमः मणिबंधे ॥ ॐ ऐंह्रीं श्रींघं नमः दक्षहस्तांगुलिमूले ॥ ॐ ऐंह्रीं श्रींङंनमः दक्षहस्तांगुल्यग्रे ॥ ॐ ऐंह्रीं श्रीं चं नमः वामबाहुमूले ॥ ॐ ऐंह्रीं श्रींछं नमः

प्र० कूर्प्परे ॥ ॐ ऐंह्रीं श्रीं जं नमः मणिबंधे ॥ ॐ ऐं
२९ ह्रीं श्रीं झं नमः वामहस्तांगुलिमूले ॥ ॐ
ऐंह्रीं श्रींञं नमः वामहस्तांगुल्यग्रे ॥ ॐ ऐंह्रीं श्रीं
टं नमः दक्षपादमूले ॥ ॐ ऐंह्रीं श्रींठं नमः जानुनि
॥ॐ ऐंह्रीं श्रींडं नमः गुल्फे ॥ ॐ ऐंह्रीं श्रींढं नमः
दक्षपादांगुलिमूले ॥ ॐ ऐंह्रीं श्रींणं नमः दक्षपादांगु
ल्यग्रे ॥ ॐ ऐंह्रींश्रींतं नमः वामपादमूले ॥ ॐ ऐंह्रीं
श्रीं थं नमः जानुनि ॥ ॐ ऐंह्रीं श्रींदं नमःगुल्फे ॥
ॐ ऐंह्रीं श्रींधं नमः वामपादांगुलिमूले ॥ ॐ ऐं
ह्रींश्रींनं नमः वामपादांगुल्यग्रे ॥ ॐ ऐंह्रीं श्रींपं

नमः दक्षपार्श्वे ॥ ॐ एह्रीं श्रींफं नमः वामपार्श्वे ॥
ॐ ऐंह्रीं श्रीं बं नमः पृष्ठे॥ ॐ एह्रीं श्रींभं नमः ना
भौ ॥ ॐ एह्रींश्रींमं नमः उदरे ॥ ॐ एह्रींश्रीं यं
त्वगात्मने नमः वामांसे ॥ ॐ ए-ह्रींश्रीं रं असृगा
त्मने नमः दक्षांसे ॥ ॐ एह्रींश्रीं लं मांसा
त्मने नमः ककुदि ॥ ॐ ऐंह्रींश्रीं वं मेदसात्म
ने नमः हृदादिदक्षकरांतम ॥ ॐ ऐंह्रींश्रींशम्
अस्थ्यात्मने नमः हृदादिदक्षकरांतम् ॥ ॐ ऐंह्रीं
श्रीं षं मज्जात्मने नमः हृदादिवामकरांतम् ॥
ॐ एह्रींश्रीं सं शुक्रात्मने नमः हृदादिदक्षपादां

तम् ॥ ॐ ऐंह्रींश्रींहं प्राणात्मने नमः हृदादि वामपादांतम् ॥ ॐ ऐंह्रींश्रींलं जीवात्मने नमः पादादिहृदंतम् ॥ ॐ ऐंह्रींश्रींक्षं परमात्मने नमः हृदादिमूर्धांतम् ॥ इति विन्यस्य ॥ पंचाशद्वर्णरूपां च कपर्दशशिभूषणाम् ॥ शुद्धस्फटिकसंकाशां शुद्धक्षौमविराजिताम् ॥ मुक्तारत्नस्फुरद्भूषां जपमालां कमंडलुम् ॥ पुस्तकं वरदानं च बिभ्रतीं परमेश्वरीम् ॥ एवं ध्यात्वा मातृका न्यस्य विद्यान्यासं कुर्यात् ॥ यथा ऐंनमः मणिबंधे ह्रींनमः तले श्रींनमः अग्रे इति दक्षकरे ॥ ऐंनमः मणिबंधे ह्रीं

नमः तले श्रींनमः अग्रे इति वामकरे ॥ ऐंनमः दक्षकक्ष्ये ह्रींनमः दक्षकूर्परे श्रींनमः दक्षपाणौ ऐंनमः वामकक्ष्ये ॥ ह्रींनमः वामकूर्परे श्रींनमः वामपाणौ ॥ ऐंनमः दक्षपादकक्ष्ये ॥ ह्रींनमः जानुनि ॥ श्रींनमः पादाग्रे ॥ ऐंनमः वामपादकक्ष्ये ॥ ह्रींनमः जानुनि ॥ श्रींनमः पादाग्रे ॥ ऐंनमः लिंगे ॥ ह्रींनमः हृदि ॥ श्रींनमः नादांते ॥ इति विद्यान्यासः ॥ अथ नवयोनिन्यासः ॥ ऐंनमः दक्षकर्णे ॥ ह्रींनमः वामकर्णे ॥ श्रींनमः चिबुके ॥ एनमः दक्षशंखे ॥ ह्रींनमः वामशंखे ॥

प्र० २७

श्रींनमः मुखे ॥ ऐंनमः दक्षनेत्रे ॥ ह्रींनमः वामनेत्रे ॥ श्रींनमः कुक्षौ ॥ ऐंनमः दक्षजानुनि॥ ह्रींनमः वामजानुनि ॥ श्रींनमः नाभौ ॥ ऐंनमः दक्षपादे ॥ ह्रींनमः वामपादे ॥ श्रींनमःहृदि ॥ ऐंनमः दक्षजानुनि ॥ ह्रींनमः वामजानुनि ॥ श्रींनमः कंठे ॥ इति नवयोनिन्यासः ॥ ततः पुनरपि षडंगन्यासः समन्वयेन॥ ऐंहृदयाय नमः॥ ह्रींशिरसे स्वाहा श्रींशिखायै वषट् ॥ प्रत्यंगिरे कवचाय हुं ॥ मम रक्षरक्षनेत्रत्रयाय वौषट् ॥ मम शत्रूणां भक्षभक्ष ॥ ॐ स्वाहा अस्त्रायफट्

इति न्यासैर्देहं संनह्य ॥ मूलाधारे मूलविद्यां विद्युत्कोटिसमप्रभाम् ॥ सूर्यकोटिप्रतीकाशां चंद्रकोटिप्रभां प्रिये ॥ बिसतंतुस्वरूपां तां बिंदुत्रिवलयां प्रिये ॥ ऊर्ध्वशक्तिनिपातेन सहजेन वरानने ॥ मूलशक्तिदृढत्वेन मध्यशक्तिप्रबोधतः ॥ परमानंदसंदोहमानंदं चिंतयेत्परम् ॥ इत्यंतर्यजनं कृत्वा पीठपूजां न्यासेन स्वदेहे कुर्यात् ॥ मूलाधारे आधारशक्तये नमः ॥ प्रकृत्यै नमः ॥ कमठाय नमः ॥ शेषाय नमः ॥ पृथिव्यै नमः ॥ सुधांबुधये नमः ॥ मणिद्वीपाय नमः ॥ चिंतामणिगृ

हाय नमः ॥ रत्नवेदिकायै नमः ॥ मणिपीठाय न
मः ॥ दिक्षु नानामुनिगणेभ्यो नमः ॥ नानादेवे
भ्यो नमः ॥ धर्माय नमःदक्षांसे ॥ ज्ञानाय नमः वा
मांसे ॥ वैराग्याय नमः वामोरौ ॥ ऐश्वर्याय न
मः दक्षोरौ ॥ अधर्माय नमः दक्षकुक्षौ ॥ अज्ञा
नाय नमः दक्षपृष्ठे ॥ अवैराग्याय नमः वामपृष्ठे ॥
अनैश्वर्याय नमः वामकुक्षौ ॥ शेषाय नमः ॥
पद्माय नमः ॥ प्रकृतिमयपत्रेभ्यो नमः ॥ विकृति
मयकेसरेभ्यो नमः ॥ पंचाशद्बीजभूषितकर्णि
कायै नमः ॥ सूर्यमंडलाय नमः ॥ सोममंडला

य नमः ॥ वैश्वानरमंडलाय नमः ॥ संसत्वाय नमः ॥ रंरजसेनमः ॥ तंतमस नमः॥ आं आत्मने नमः ॥ अंअंतरात्मने नमः ॥ पंपरमात्मने नमः ॥ ह्रींज्ञानात्मने नमः॥ पन्नेषु वामायै नमः ॥ ज्येष्ठायै नमः ॥ रौद्र्यै नमः ॥ अंबिकायै नमः ॥ इच्छायै नमः ॥ ज्ञानायै नमः॥क्रियायै नमः ॥ कुब्जिकायै नमः ॥ चित्रायै नमः ॥ विषघ्निकायै नमः ॥ दूतायै नमः ॥ आनंदायै नमः ॥ मध्ये मनोन्मन्यै नमः ॥ ऐंपरायै नमः ॥ अपरायै नमः ॥ विरूपायै नमः ॥ परापरायै नमः ॥ हसौं सदाशिवमहाप्रेतासनायै

नमः ॥ ब्रह्मविष्णुरुद्रेश्वरसदाशिवमहाप्रेतमहा
पद्मासनाय नमः ॥ परमशिव पर्यंकाय नमः ॥
इति पीठं न्यस्य॥तत्रैव हृदये स्वाभेदेन श्रीप्रत्यंगिरां
ध्यायेत् ॥ ॐ ऊर्ध्वे कपालं डमरुं त्रिशूलं संबिभ्रती
बद्धकलावतंसम् ॥ पिंगोर्ध्वकेशी सितभीमदंष्ट्रा
भूयाद्विभूत्यै मम भद्रकाली ॥ इति श्रीप्रत्यंगिरां
ध्यात्वा मानसोपचारैराराध्य ॥ मनसा यथाशक्ति
जपहोमादिकं च कृत्वा कामकलां विचिंत्य तदुपरि
श्रीप्रत्यंगिरां यथोक्तां ध्यायन् स्ववामभागे षट्को
णांतर्गतत्रिकोणद्वयबिंदुं वा स्ववृत्तचतुरस्रं कृत्वा ॥

स्वदक्षे त्रिकोणं वृत्तं बिंबमंडलं भूमौ विरच्य ॥ त
त्राधारशक्तिं प्रपूज्य तत्राधारं निक्षिप्य तदुपरि अ
मंत्रेण शोधितं हृन्मंत्रेण पूरितं पात्रं शंखादिकं वा
संस्थाप्य तत्रगंगेत्यादितीर्थमावाह्य ॥ गंधादीन्प्र
णवेन निक्षिप्य वह्निसूर्यसोमकलाभिः संपूज्य धे
नुमुद्रां प्रदर्श्य स्वमंत्रेण संपूजयेदितिविधिविहितसा
मान्यार्घोदकेन स्ववामेकृतमभ्युक्ष्य ॥ तत्राधारश
क्तिभ्यो नम इत्यादि पीठपूजाक्रमेण संपूज्य नमः
इत्याधारं प्रक्षाल्य मंडलोपरि संस्थाप्य ॥ रं वह्निमं
डलाय दशकलात्मने नमः इति प्रपूज्य ॥ फडिति

प्र०
३०

कलशं प्रक्षाल्य ॥ कारणेनाऽऽपूर्य ॥ रक्तवस्त्रमाल्या
दिना संभूष्य ॥ मध्ये संस्थाप्य ॥ अं अर्कमं
डलाय द्वादशकलात्मने नमः इति कलशं संपू
ज्य ॥ ॐ चंद्रमंडलाय षोडशकलात्मने नमः
इति द्रव्ये च संपूज्य ॥ फडिति संरक्ष्य हुमित्यव
गुंठ्य मूलेन संवीक्ष्य ॥ नमः इत्यभ्युक्ष्य मूलेन
गंधमाघ्राय ॥ कुंभे पुष्पं दत्त्वा ॥ शापमोचनं
कुर्यात् ॥ एवमेव परब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ॥
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ १ ॥
सूर्यमंडलसंभूते वरुणालयसंभवे ॥ अमाबीजमये

देवि शुक्रशापाद्विमुच्यताम् ॥ २ ॥ वेदानां प्रणवो बीजं ब्रह्मानंदमयं यदि ॥ तेन सत्येन हे देवि ब्रह्महत्यां व्यपोहतु ॥ ३ ॥ इति त्रिः ॥ ततः ॐ वांवींवूंवैंवौंवः ॥ ब्रह्मशापमोचितासुरादेव्यै नमः ॥ इत्यपि त्रिः ॥ ह्रींश्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः सुराकृष्णशापं मोचय मोचय अमृतं स्रावय स्रावय स्वाहा इति त्रिः ॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॰नृष॰ द्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतम् ॥ इत्यपि त्रिः पठित्वा ॥ आनंदभैरवं सुराभैरवीं च तत्र ध्यात्वा ॥ हसरक्षमलवय ॥ ॐ आनंदभैरवाय वौ

षट् ॥ सहक्षमलवयहुं सुरादेव्यै वौषट् ॥ इति देव
देव्यौ त्रिः संपूज्य द्रव्यमध्ये दक्षिणावर्तेन त्रि
पंक्त्या अंनमः आंनमः इंनमः ईंनमः उंनमः
ऊंनमः ऋंनमः ॠंनमः लृंनमः लॄंनमः एंन
मः ऐंनमः ओंनमः औंनमः अंनमः अःनमः
कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः
छंनमः जंनमः झंनमः ञंनमः टंनमः ठंनमः
डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः
धंतमः नंनमः पंनमः फंनमः बंनमः भंनमः
मंनमः यंनमः रंनमः लंनमः वंनमः शंनमः

षंनमः संनमः क्षंनमः इति शक्तिचक्रं विलिख्य ॥
तन्मध्ये हंनमः क्षंनमः तत्समावेशाद्द्रव्यमध्ये
ऽमृतं विचिंत्य धेनुमुद्रयाऽमृतीकृत्य वमिति
सुधाबीजं मूलं पठन् घटं धृत्वात्मश्रीचक्रयोर्मध्ये
त्रिकोणषट्कोणवृत्तचतुरस्रे विलिख्य चतुरस्रे
पूर्णगिरिपीठाय नमः उड्डीयानपीठाय नमः का
मरूपपीठाय नमः जालंधरपीठाय नमः इति सं
पूज्य षट्कोणेषडंगं संपूज्य त्रिखण्डेन कोणाग्रद
क्षोत्तरं संपूज्य मध्ये आधारशक्तिं संपूज्य त्रि
कोणगर्भे यंत्रिकां संस्थाप्य नमः इति सामान्यज

लेनाभ्युक्ष्य पं धूम्रार्चिषे नमः रं ऊष्मायै नमः लं ज्वालिन्यै नमः वं ज्वलिन्यै नमः शं विस्फुलिंगिन्यै नमः षं सुप्रियायै नमः संस्वरूपायै नमः हंकपिलायै नमः ळं हव्यवाहायै नमः क्षं कव्यवाहायै नमः इति संपूज्य मध्ये रंवह्निमंडलाय दशकलात्मने नमः इति संपूज्य षट्कोणे षडंगं च संपूज्य मध्ये मूलेन देवीं संपूज्य पात्रं फडिति प्रक्षाल्य यंत्रिकोपरि संस्थाप्य तत्रकंभं तपिन्यै नमः खंबं तापिन्यै नमः गंफं धूम्रायै नमः घंपं मरीच्यै नमः ङं नं ज्वलिन्यै नमः चं धं रुच्यै नमः छंदं सुषुम्णायै नमः

जंथं भोगदायै नमः झंतंविश्वायै नमः ञंणंबोधि न्य नमः टंठं धारिण्यै नमःठंडं क्षमायै नमःइति अं अर्कमंडलाय द्वादशकलात्मने नमः इति संपूज्य त्रिकोणवृत्तषट्कोणपात्रं विलिख्य समस्तव्य स्तमंत्रेण संपूज्य वरुणबीजं विलोममातृकां च पठन् भूतेन त्रिकोणजलेनापूर्यं तत्र सुगंधादि निक्षिप्य ॥ अं अमृतायै नमः आंमानदायै नमः इं पूषायै नमः ईंतुष्ट्यै नमः उं पुष्ट्यै नमः ऊं रत्यै नमः ऋंधृत्यै नमः ॠंशशिन्यै नमः ऌं चंद्रिकायै नमः ॡं कांत्यै नमः एं ज्योत्स्नायै नमः ऐंश्रियै

नमः ॥ ओं प्रीत्यै नमः ॥ औं अंगदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नमः इति षोडश कलात्मने सोममंडलाय नमः इति संपूज्य पूर्ववन्मंत्रद्रव्ये विलिख्य त्रिकोणत्रिरेखायां अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कंखंगंघंङं चंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसं- इति त्रिस्त्रिर्विलिख्य मूलखंडत्रयेण त्रिकोणं संपूज्य षट्कोणे षडंगं च संपूज्य गंगेत्यादिती र्थमावाह्य आनंदभैरवभैरव्यौ स्वमंत्रेण संपूज्य पूर्वादितः॥ ग्लूं गगनरत्नेभ्यो नमः पूर्वे ॥ श्लूंस्व

गरत्नेभ्यो नमः दक्षिणे॥ प्लूं पातालरत्नेभ्यो नमः
पश्चिमे। म्लूं मर्त्यरत्नेभ्यो नमः उत्तरे॥ न्लूं नागर
त्नेभ्यो नमः मध्ये। इति संपूज्य। मांसादि संशो
ध्य हुमित्यवगुंठ्य अमृतीकृत्य तालत्रयेण दिशः
संबध्य तदुपरि सप्तधा मूलं संपूज्य तत्र देवीमा
वाह्य तालत्रयेण दिग्बंधं विधायावगुंठ्यामृतीकृ
त्य योनिं प्रदर्श्य ह्सौं नमः संपूज्य शंखमुद्रां प्रद
र्श्य षडंगेन संकलीकृत्य मत्स्यमुद्रया आच्छाद्य
मूलं सुधाबीजं जप्त्वा पात्रं देवीरूपं विभावयेदि
ति। ततो देव्याज्ञामादाय घटसमीपे चरुपात्रं

ततः शक्तिपात्रं भोगपात्रं स्वपात्रं योगिनीपात्रं वीरपात्रं बलिपाद्यार्घ्याचमनीयपात्राणि संस्थाप्य चर्वणयुतकारणेन तत्तन्मुद्रया श्रीपात्रात्समुद्धृत्य आनंदभैरवं तर्प्पयामि नमः इति मंत्रेण त्रिः संतर्प्य ततः गुरुं श्रीमच्छ्रीअमुकानंदनाथश्रीपादुकां तर्प्पयामि नमः इति त्रिः संतर्प्य परमगुरुश्रीअमुकानंदनाथश्रीपादुकां तर्प्पयामि नमः इति त्रिः संतर्प्य परमाचार्यगुरुश्रीमच्छ्रीअमुकानन्दनाथश्रीपादुकां तर्प्पयामि नमः इति त्रिः संतर्प्य ॥ श्रीपात्रामृतेन मूलदेवीं सायुधां स

वाहनां सपरिवारां तर्प्पयामि नमः इति संत
र्प्पयेदिति कलशपूजाविधिः ॥ चक्रोपरि पीठो
परि पीठपूजां पूर्ववद्विधाय ॥ अथ श्रीप्रत्यंगिरां
ध्यात्वा वायुबीजेन वामनासापुटेन देवीस्वहृदया
त्कुसुमांजलिमानीय तत्रावाह्य ॥ ॐ देवेशि
भक्तिसुलभे परिवारसमन्विते ॥ यावत्त्वां पूजयि
ष्यामि तावद्देवि इहावह इति पठित्वा मूलं श्रीभै
रवसहिते श्रीप्रत्यंगिरे इहागच्छ गच्छ इह सन्नि
रुद्ध्य सन्निरुद्ध्य मम सर्वोपचारसहितां पूजां
गृह्ण गृह्ण इत्यावाहनादिमुद्राः प्रदर्श्य प्राणप्रतिष्ठां

श्रीचक्रे लेलिहानमुद्रया विधाय दशदिग्बंधनं कृत्वाऽवगुंठ्य संकलीकृत्य परमीकृत्य धेनु योनिं प्रदर्श्य वराभयपुस्तकाक्षमालाज्ञानांकुशपाशचापबाणकपालादिमुद्राः प्रदर्श्य श्रीपात्रामृतेन सायुधां सवाहनां सपरिवारां सावरणां श्रीभैरव सहितां श्रीप्रत्यंगिरां तर्पयामीति त्रिः संतर्प्य पुनरपि मूलेन प्रत्यंगिराश्रीपादुकां तर्प्पयामि नमः इति त्रिः संतर्प्य मूलमुच्चार्य एतत्पाद्यं श्रीभैरव सहितप्रत्यंगिरायै नमः पाद्यम् एवमर्घ्यं स्वाहा शिरसि आचमनीयं मधुपर्कं च सुधामुखे स्नानाय

नमः सर्वांगे इति सुस्नाप्य शुद्धदुकूलेनांगं प्रोच्छ्य
विचित्रपटवस्त्रकुंकुमकस्तूरीचन्दनसिन्दूरमुकुटकु
ण्डलहारनूपुरादिनानालंकारान्दत्त्वा पुनराचम
नीयं दद्यात् ततो मध्यानामांगुष्ठाग्रैर्गंधो नमः
इति गंधम् अंगुष्ठतर्ज्जनीभ्यां पुष्पाणि वौषट्
इति पुष्पैः संपूज्य धूपपात्रं फडिति संपूज्य पुरतः
स्थापयित्वा वामतर्ज्जनीं संस्पृशन् श्रीपात्रा
मृतेन धूपं निवेदयामि निवेद्य ॥ ॐ जगद्ध्वनिमं
त्रमातः स्वाहेति घंटां संपूज्य वामेन पाणिना तां
वादयन् मध्यानामांगुष्ठैर्धूपं धृत्वा गायत्री

मूलमंत्रं च पठन् वनस्पतिरसोत्पन्नो गंधाढ्यो
गंधसंयुतः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्य
ताम्॥इति त्रेधोत्तोल्य देवीं धूपयेत् । ततो दीपं
संमुखे संस्थाप्य पूर्ववत्प्रोक्षणं पूजनं कृत्वा वामम
ध्यमया दीपपात्रं स्पृशन् दीपं निवेदयामीति
निवेद्य पूर्ववद्घंटां वादयन् मध्यानामामध्ये दीपपा
त्रमंगुष्ठेन धृत्वा दर्शयन् गायत्रीं मूलं च पठन् सुप्र
काशो महादीपः सर्वत्रतिमिरापहः ॥ सबाह्याभ्य
तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् इति दीपयेत् ॥
ततः स्वर्णादिपात्रे कुंकुमेन वा सुपात्रं चंद्ररूपं चरुं

कृत्वा मध्ये दीपमेकमष्टपत्रेषु दीपाष्टकं संस्थाप्य श्रींसौं ग्लूं म्लूं स्लूं प्लूं ब्लूं सौं श्रींरत्नेश्वर्यै नमः इति मूलेनाभ्यर्च्य स्थालकं मस्तकांतमुद्धृत्य नववारं मूलं पठित्वा ॥ समस्तचक्रचक्रेशियुते देवि नवात्मिके ॥ आरार्तिकमिदं देवि गृहाण मम सिद्धये इतिचक्रमुद्रया नीराजयेत ॥ ततो नानानैवेद्यं स्वर्णादिपात्रे निक्षिप्य हमित्यवगुंठ्य धेनुमुद्रया ऽमृतीकृत्य नैवेद्यपात्रं स्पृशन् मूलांते हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम् । पंचधा षड्रसोपेतं गृहाण परमेश्वरि नैवेद्यंनिवेदयामीतिदक्षानामांगुष्ठा

प्र० ३७

भ्यामुत्सृजेत ततः पुनराचमनीयं दत्त्वा मूलादितो कर्प्पूरादियुक्ततांबूलं निवेदयामीति पूर्ववद्दद्यात् सर्वेषामर्घ्यपात्रजलेनोत्सर्गः कार्यः ततस्तत्त्वमुद्रया देवीं त्रिः संतर्प्य पूर्वोक्तमुद्राः प्रदर्श्य योनिं हृदि क्षोभिणीं मुखे द्राविणीं भ्रूमध्ये आकर्षणीं ललाटेयशिनीं ब्रह्मरंध्रे आह्लादिनीं पंचमुद्रामयीं प्रदर्श्य कृतांजलिः श्रीप्रत्यंगिराया आवरणपूजामारभेत तत्रादौ चतुरस्रपूर्वादितः इंद्रश्रीपादुकां पूजयामि नमः आग्नेय्यां अग्निश्रीपादुकांपूजयामि नमः दक्षिणे यम श्रीपादुकां पूजयामि नमः

नैर्ऋत्यां निर्ऋति श्रीपादुकां पूजयामि नमः पश्चिमे वरुणश्रीपादुकां पूजयामि नमः वायव्ये वायु श्री पादुकां पूजयामि नमः उत्तरे कुबेर श्रीपादुकां पूजयामि नमःईशान्ये ईशान श्रीपादुकां पूजयामि नमः इंद्रेशानयोर्मध्ये ब्रह्म श्रीपादुकां पूजयामि नमःवरुणराक्षसयोर्मध्ये विष्णुश्रीपादुकां पूजयामि नमः इति पूजयेत्तर्प्पयेच्च ततस्तत्समीपे वज्र श्रीपादुकां पूजयामि तर्प्पयामि नमः शक्ति श्रीपादुकां पूजयामि तर्प्पयामि नमः दंड श्रीपादुकां पूजयामि तर्प्पयामि नमः खड्ग श्रीपादुकां पूजयामि

प्र०
३८

तर्प्पयामि नमः पाशश्रीपादुकां पूजयामि तर्प्पयामि नमः ध्वजश्रीपादुकां पूजयामि तर्प्पयामि नमः गदाश्रीपादुकां पूजयामि तर्प्पयामि नमः त्रिशूलश्री पादुकां पूजयामि तर्प्पयामि नमः पद्म श्रीपादुकां पूजयामि तर्प्पयामि नमःचक्रश्रीपादुकां पूजयामि तर्प्पयामि नमः इति पूजयेत्तर्प्पयेच्च ततस्त्रिवृत्ते कौलानंदनाथश्रीपादुकां पूजयामि तर्प्पयामि नमः परमगुरुश्रीपादुकां पूजयामि तर्पयामिनमः परमाचार्यश्रीपादुकां पूजयामि तर्प्पयामि नमः परमेष्ठिश्रीपादुकां पूजयामि तर्प्पयामि नमः दिव्यौघ

श्रीपादुकां पूजयामि तर्प्पयामि नमः सिद्धौघश्री
पादुकां पूजयामि तर्प्पयामि नमः मानवौघश्रीपा
दुकां पूजयामि तर्प्पयामि नमः पुनः स्वगुरुश्रीपा
दुकां पूजयामि तर्प्पयामि नमः इति पूजयेत्तर्प्प
येच्च । ततोऽष्टदलेषु पूर्वादितः अंअसितांगभैरव
श्रीपादुकां पूजयामि तर्प्पयामि नमः आं ब्राह्मीश्री
पादुकां पूजयामितर्प्पयामि नमः पूर्वे । इंरुरुभैरव
श्रीपादुकां पूजयामि तर्प्पयामि नमः ईंमाहेश्वरी
श्रीपादुकां पूजयामि तर्प्पयामि नमः आग्नेये । उं
चंडभैरवश्रीपादुकां पूजयामि तर्प्पयामि नमः ऊं

प्र०
३९

कौमारीश्रीपादुकां पूजयामि तर्पयामि नमःदक्षिणे।
ऋंक्रोधभैरवश्रीपादुकां पूजयामि तर्प्पयामि नमः
ॠंवैष्णवीश्रीपादुकां पूजयामि तर्प्पयामि नमः
नैर्ऋते। ऌं उन्मत्तभैरवश्रीपादुकां पूजयामि तर्प्प
यामि नमः। ॡंवाराही श्रीपादुकां पूजयामि तर्प्प
यामि नमःपश्चिमे। एं कपालिभैरवश्रीपादुकां पूज
यामि तर्प्पयामि नमःऐं माहेंद्रीश्रीपादुकां पूजयामि
तर्प्पयामि नमः वायव्ये। ओंभीषणभैरवश्रीपा
दुकां पूजयामि तर्प्पयामि नमः। औं चामुंडाश्रीपा
दुकां पूजयामि तर्प्पयामि नमःउत्तरे। अं संहारभैरव

श्रीपादुकां पूजयामि तर्प्पयामि नमः । अं: नार
सिंहीश्रीपादुकां पूजयामि तर्प्पयामि नमः
ईशान्ये । इति पूजयेत्तर्प्पयेच्च । ततो ग्रंथिस्थानेषु
पश्चिमादितः कामरूपपीठश्रीपादुकां पूजयामि
तर्प्पयामि नमः । वायव्ये मलयगिरिपीठश्रीपा
दुकां पूजयामि तर्पयामि नमः । उत्तरे कोलगिरि
पीठश्रीपादुकां पूजयामि तर्प्पयामि नमः । ईशा
न्ये कालांतकपीठश्रीपादुकां पूजयामि तर्प्पयामि
नमः । पूर्वे चौहारपीठश्रीपादुकां पूजयामि तर्प
यामि नमः । आग्नेये जालंधरपीठश्रीपादुकां पूज

यामि तर्प्पयामि नमः। दक्षिणे उड्डीयानपीठश्री
पादुकांपूजयामि तर्प्पयामि नमः। नैर्ऋते देवकूट
पीठश्रीपादुकां पूजयामि तर्प्पयामि नमः। इति
पूजयेत्तर्प्पयेच्च ततो वृत्तमंडले पश्चिमादितः ऊर्ध्व
मधश्च हेरुकभैरव श्रीपादुकांपूजयामि तर्प्पयामि
नमः। वायव्ये वेतालभैरवश्रीपादुकां पूजयामि
तर्प्पयामि नमः। उत्तरे त्रिपुरांतकभैरवश्री
पादुकां पूजयामि तर्प्पयामि नमः। ईशान्ये अग्नि
जिह्वभैरवश्रीपादुकां पूजयामि तर्प्पयामि नमः।
पूर्वे कालांतकभैरवश्रीपादुकां पूजयामि तर्प्पयामि

मिनमः । आग्नेये कपालिभैरवश्रीपादुकां पूजयामि तप्पर्यामि नमः दक्षिणे एकपादभैरवश्रीपादुकां पूजयामि तर्पयामि नमः । नैर्ऋते भीमरूपभैरव श्रीपादुकां पूजयामि तर्प्पयामि नमः । ऊर्ध्वे मल यभैरवश्रीपादुकां पूजयामि तर्प्पयामि नमः । अधः हाटकेश्वरभैरवश्रीपादुकां पूजयामि तर्पयामि नमः । इति पूजयेत्तर्पयेच्च । ततोऽष्टयोनिषु पूर्वादितः ॐ ऐंह्रींश्रींस्तंभिनीश्रीपादुकां पूजयामि तर्पयामि नमः । ॐ ऐंह्रींश्रींक्षोभिणीश्रीपादुकां पूजयामि तर्पयामि नमः । ॐ ऐंह्रींश्रींद्राविणिश्रीपादुकां पूज

यामि तर्प्पयामि नमः। ॐ ऐंह्रींश्रींभ्रामणीश्रीपादु
कां पूजयामि तर्पयामि नमः। ॐऐंह्रींश्रींरौद्रीश्रीपा
दुकां पूजयामि तर्पयामि नमः। ॐऐंह्रींश्रींसंहारिणी
श्रीपादुकां पूजयामि तर्प्पयामि नमः।इति पूजयेत्त
र्प्पयेच्च। ततो ॐ ऐंह्रींश्रींआग्नेये हृदय श्रीपादुकां
पूजयामि तर्पयामि नमः।ॐऐंह्रींश्रींईशाने शिरःश्री
पादुकां पूजयामि तर्प्पयामि नमः।ॐऐंह्रींश्रींनैर्ऋते
शिखाश्रीपादुकां पूजयामि तर्पयामि नमः। ॐ ऐं
ह्रींश्रींवायव्ये कवचश्रीपादुकां पूजयामि तर्पयामि
नमः। ॐ ऐंह्रींश्रींमध्ये नेत्रश्रीपादुकां पूजयामि

तर्पयामि नमः । ॐ ऐंह्रींश्रींदिक्षुअस्त्रश्रीपादुकां पूजयामि तर्पयामि नमः इति पूजयेत्तर्पयेच्च । तत स्त्रिकोणे । ॐ ऐंह्रींश्रींआग्नेये कालीश्रीपादुकां पूजयामि तर्पयामि नमः ॐ ऐंह्रींश्रींईशाने भद्र कालीश्रीपादुकां पूजयामि तर्पयामि नमः ॐ ऐंह्रींश्रींआग्नेये नित्याकालीश्रीपादुकां पूजयामि तर्पयामि नमः इति पूजयेत्तर्पयेच्च । ततो बिंदौ मूलमुच्चार्य्य श्रीभैरवसहितां श्रीमच्छ्रीप्रत्यंगिरापरा वामपादुकां पूजयामि तर्पयामि नमः इति पूजयेत्तर्प येच्च पुनश्चतुरस्रेपश्चिमेबांबटुकं पूजयामि नमःउत्तरे

यांयोगिनीभ्यो नमः पूर्वे क्षां क्षेत्रपालाय नमः
दक्ष गं गणपतये नमः इति पूजयेत्तर्पयेच्च वायव्ये
वसुधाभ्यो नमः ईशानेद्वादशादित्येभ्योनमः
आग्नेये एकादशरुद्रेभ्यो नमः नैर्ऋते सर्वेभ्यो
भूतेभ्यो नमः इति पूजयेत्तर्पयेच्च इति संपूज्य ततो
देवीसमीपेदक्ष हस्ते असिश्रीपादुकां पूजयामि
तर्पयामि नमः चर्मश्रीपादुकां पूजयामि तर्पयामि
नमः पुनरपि बिंदौ पूर्ववन्मूले देवीं संपूज्य संतर्प्य
मुद्राः प्रदर्श्य पुष्पांजलित्रयेण संपूज्य नित्यहोम
माचरेत् यथा अग्नौ जले वा चक्रे विलि

ख्य विभाव्य च ॥ प्राणाय स्वाहा व्यानाय स्वाहा
उदानाय स्वाहा अपानाय स्वाहा समानाय स्वा
हा इति हुत्वा षडंगाहुतीः कुर्यात् । ततः मूलेनास्य
देव्यै हुत्वा स्वहृदि विसृज्य ईशाने मंडलं कृत्वा बां
बटुकाय नमः एह्येहि देवीपुत्रबटुकनाथ कपिलज
टाभारभास्वरत्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय२
सर्वोपचारसहितं बलिं गृह्ण२स्वाहा आग्नेय्यां
योगिनीभ्यो नमः ॥ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगन
तले भूतले निष्कले वा पाताल वा तले वा पवनस
लिलयोर्यत्र कुत्र स्थिता वा ॥ क्षेत्रेपीठोपपीठादि

षु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा
नः शुभवलिविधिना पातु वीरेंद्रवंद्या ॥ १ ॥ यां
योगिनीभ्योनमः स्वाहा सर्वयोगिनीह्रींफट्स्वाहा
इति योगिनीबलिः नैर्ऋते क्षांक्षींक्षूंक्षक्षौंक्षः क्षेत्र
पालअतिबलिसहितं बलिंगृह्ण २ स्वाहा इति
क्षेत्रपालबलिः वायव्ये गांगींगूंगणपतये वरवरस
र्वजनं मे वशमानय बलिं गृह्ण २ स्वाहा इति
गणपतिबलिः इति बलिं विरचय्य छागादिबलिम
पि दत्त्वा गुरुदेव्यौ ध्यायन् यथाशक्ति जपं वि
धाय पुनरपि प्राणायामऋष्यादिकरांगन्यासा

नंतरं गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि॥ इत्यनेनते
जोमयं जपफलं देवीवामहस्ते समर्प्य कवचनामस
हस्रस्तोत्रादि पठित्वाष्टांगं प्रणिपत्य प्रदक्षिणीकृत्य
सामयिकैः सह मंडलवंदनं विधाय नंदंतु साधकाः
सर्वे विनश्यंतु विदूषकाः । अवस्था शांभवीमेऽस्तु
प्रसन्नोऽस्तु गुरुः सदा ॥ इत्यादिशांतिं पठित्वा ई
शान्ये निर्माल्येन निर्माल्यवासिन्यै नमः इति संपू
ज्य ततः इति पूर्वं जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा
वाचा पद्भ्यामुदरेण शिश्नाप्राणदेहधर्मादिकारणतो

युक्तं यत्कृतं तत्सर्वं मदीयं श्रीप्रत्यंगिराचरणे सम
र्पणमस्तु ॐ तत्सत् इति समर्प्य सुखं विहरेदिति
शिवं भद्रम् ॥ इति श्रीरुद्रयामले तंत्रे उमामहेश्वर
संवादे पंचांगखंडे प्रत्यंगिरापद्धतिः समाप्ता ॥

॥ देव्युवाच ॥ भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपा
रग ॥ देव्याः प्रत्यंगिरायाश्च कवचं यत्प्रकाशितम्
॥ १ ॥ सर्वार्थसाधनं नाम कथयस्व मयि प्रभो ॥
॥ भैरव उवाच ॥ शृणु देवि प्रवक्ष्यामि कवचं पर
माद्भुतम् ॥२॥ सर्वार्थसाधनं नाम त्रैलोक्ये चातिदु

र्लभम् ॥ सर्वसिद्धिमयं देवि सर्वैश्वर्यप्रदायकम् ॥३॥
पठनाच्छ्रवणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ स
र्वार्थसाधकस्यास्य कवचस्य ऋषिः शिवः ॥ ४ ॥
छंदोविराट्परा शक्तिर्जगद्धात्री च देवता ॥ धर्मार्थ
काममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ ५ ॥ प्रणवं
मे शिरः पातु वाग्भवं च ललाटकम् ॥ ह्रीं पातु दक्षने
त्रंमे लक्ष्मीर्वामं सुरेश्वरी ॥ ६ ॥ प्रत्यंगिरा दक्षक
र्णं वामे कामेश्वरी तथा। लक्ष्मी प्राणं सदा पातु वं[illegible]
नं पातु केशवः॥७॥गौरी तु रसनां पातु कंठं पातु
महेश्वरः॥स्कंधदेशं रतिःपातु भुजौ तु मकरध्वजः॥

॥८॥ शंख निधिकरः पातु वक्षः पद्मनिधिस्तथा ॥
ब्राह्मी मध्यं सदा पातु नाभिं पातु महेश्वरी ॥ ९ ॥
कौमारी पृष्ठदेशं तु गुह्यं रक्षतु वैष्णवी ॥ वाराही च
कटिं पातु चैंद्री पातु पदद्वयम् ॥१०॥ भार्यां रक्षतु चा
मुंडा लक्ष्मी रक्षतु पुत्रकान् ॥ इंद्रः पूर्वे सदा पातु आग्ने
य्यामग्निदेवता ॥११॥ याम्ये यमः सदा पातु नैर्ऋ
त्यां निर्ऋतिस्तथा ॥ पश्चिमे वरुणः पातु वायव्यां
वायुदेवता ॥ १२ ॥ सौम्यां सोमः सदा पातु चैशा
न्यामीश्वरो विभुः ॥ ऊर्ध्वे प्रजापतिः पातु ह्यधश्चानं
तदेवता ॥१३॥ राजद्वारे श्मशाने च अरण्ये प्रांतरे

तथा॥जले स्थले चांतरिक्षे शत्रूणां निवहे तथा॥१४॥
एताभिः सहिता देवी चतुर्बीजा महेश्वरी॥ प्रत्यं
गिरा महाशक्तिः सर्वत्र मां सदावतु ॥१५॥ इति ते
कथितं देवि सारात्सारं परात्परम्॥ सर्वार्थसाधनं
नाम कवचं परमाद्भुतम्॥ १६॥ अस्यापि पठना
त्सद्यः कुबेरोऽपि धनेश्वरः॥ इंद्राद्याः सकला देवा
धारणात्पठनाद्यतः ॥ १७॥ सर्वसिद्धीश्वराः संतः
सर्वैश्वर्यमवाप्नुयुः ॥ पुष्पांजल्यष्टकं दत्त्वा मूले
नैव सकृत्पठेत॥ १८॥ संवत्सरकृतायास्तु पूजा
याः फलमाप्नुयात्॥ प्रीतिमन्योन्यतः कृत्वा

प्र० ४६

कमला निश्चला गृहे ॥ १९ ॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥ यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधम् ॥२०॥ कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्य विजयी भवेत ॥ २१ ॥ पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ॥ बहुपुत्रवती भूत्वा धन्यापि लभते सुतम्॥२२॥ब्रह्मास्त्रादीनि शस्त्राणि नैवकृन्तन्तितत्तनुम् ॥ एतत्कवचमज्ञात्वा यो जपेत्परमेश्वरीं ॥२३॥ दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात ॥ इति श्रीरुद्रयामले तंत्रे पंचांगखंडे प्रत्यंगिरायाः

सर्वार्थसाधनं नाम कवचं समाप्तम् ॥ ॥ ॥
ईश्वर उवाच ॥ श्रृणु देवि प्रवक्ष्यामि सांप्रतं त्वत्पुरः
सरम् ॥ सहस्रनामपरमं प्रत्यंगिरायाः सिद्धये ॥
सहस्रनामपाठे यः सर्वत्र विजयी भवेत् ॥ परा
भवो न चास्यास्ति सभायां वासने रणे ॥ तथा तु
ष्टा भवेद्देवी प्रत्यंगिरास्य पाठतः ॥ यथा भवति
देवेशि साधकः शिव एव हि ॥ अश्वमेध
सहस्राणि वाजपेयस्य कोटयः ॥ सकृत्पाठेन जा
यंते प्रसन्ना यत्परा भवेत् ॥ भैरवोऽस्य ऋषिश्छंदोऽ
नुष्टुप्देवी समीरिता ॥ प्रत्यंगिराविनियोगः स्या

प्र०
४७

त्सर्वसंपत्तिहेतवे ॥ सर्वकार्येषु संसिद्धिः सर्वसंपत्तिदा भवेत्।एवं ध्यात्वा पठेद्देवीं यदीच्छेदात्मनो हितम्। अथ ध्यानम्। आशांबरा मुक्तकचा घनच्छविर्ध्येया सचर्मासिकरा विभूषणा। दंष्ट्रोग्रवक्त्रा ग्रसिताहिता त्वया प्रत्यंगिरा शंकरतेजसेरिता ॥ ॐ अस्य श्रीप्रत्यंगिरामहामंत्रस्य भैरव ऋषिः अनुष्टुप् छंदः ॥ श्रीप्रत्यंगिरा देवता ह्रींबीजं श्रीं शक्तिः स्वाहाकीलकं विद्यासिद्ध्यर्थे जपपाठे विनियोगः ॥ ॐदेवी प्रत्यंगिरा सेव्या शिरसा शशिशेखरा ॥ समभासा धर्मिणी च समस्तसुरशीमुखी? ॥ सर्वसंप

त्तिजननीसमधासिंधुसेविनी ॥ शंभुसीमंतिनी सो
माराध्या च वसुधा रसा ॥ रसा रसवती वेला वन्या
च वनमालिनी ॥ वनजाक्षी वनचरी वनीवनविनो
दिनी ॥ वेगिनी वेगदा वेगबलास्थानबलाधिका ॥
कला कलाप्रिया कौलिकोमला कालकामिनी ॥ क
मला कमलास्या च मलस्याकमलावती ॥ कुलीना
कुटिला कांता कोकिलाकुलभाषिणी ॥ कीरकेलिः
कला काली कपालिन्यपि कालिका ॥केशिनी च कु
शावर्त्ता कौशांबी केशवप्रिया ॥ काशी काशापहा
कांशीशंकाशाकेशदायिनी ॥ कुंडलीकुंडलीस्था

चकुंडलांगदमंडिता ॥ कुशापाशी कुमुदिनी कुमु
दप्रीतिवर्धिनी ॥ कुंदप्रिया कुंदरुचिः कुरंगम
दमादिनी ॥ कुरंगनयना कुंदा कुरुवृंदाभिनंदि
नी ॥ कुसुंभकुसुमा किंचित्कणत्किंकिणिकाक
टुः ॥ कठोरा करणा कंठा कौमुदी कंबुकण्ठिनी ॥
कपर्दिनी कपटिनी कठिनी कालकंठिका ॥ कि
बृहस्ता कुमारी च कुरुंदा कुसुमप्रिया ॥ कुंजरस्था
कुंजरताकुंभिकुंभस्तनद्वया ॥ कुंभिगा करभोरुश्च
कदलीदलशालिनी ॥ कुपिता कोठरस्था च कं
काली कंदशोदरा ॥ एकांतवासिनी किंचित्कंपमा

नशिरोरुहा ॥ कादंबरी कदंबस्था कुंकुमी प्रेमधारि
णी॥कुटुंबिनी प्रियायुक्ता क्रतुः क्रतुकरी क्रिया ॥
कात्यायनी कृत्तिका च कार्त्तिकेयप्रवर्त्तिनी ॥ का
मपत्नी कामधात्री कामेशी कामवंदिता ॥ काम
रूपा कामगतिः कामाक्षी काममोहिता ॥ खड्गिनी
खचरी खंजा खंजरीटेक्षणा खला ॥ खरगा खर
नासा च खरास्या खेलनप्रिया॥खरांशुः खेटिनी ख
ड्गा।खरखड्गांगधारिणी॥ खलखंडिनिविख्यातिःखंडि
ताखंडवी स्थिरा ॥ खंडप्रिया खंडखाद्या सेंदुखंडा
च खंजनी ॥ गंगा गोदावरी गौरी गोमत्यापि च

प्र०
४९

गौतमी ॥ गयागौगजीगगना गारुडी गरुडध्वजा ॥ गीता गीताप्रिया गोत्रगोत्रक्षयकरी गदा ॥ गिरिभूपालदुहिता गोगा गोकुलवर्धिनी । घनस्तनी घनरुचिर्घनोरुर्घननिःस्वना ॥ घूत्कारिणी घूतकरी घुघूकपरिवारिता ॥ घंटानादप्रिया घंटाघनाघोटप्रवाहिनी । घोररूपा च घोरा च घूनीप्रीतिर्घनांजनी ॥ घृताची घनमुष्टिश्च घटाघंटाघटामृता ॥ घटास्या घटनाद्यैश्च घातपातनिवारिणी ॥ चंचरीका चकोरी च चामुंडा चीरधारिणी ॥ चातुरी चपला चास्खला चेलाचलाचला । चतुश्चिरंतना चाकाचिया

चामीकरच्छविः । चापिनी चपला चंपूश्चितिता चिं
तामणिश्चिता ॥ चातुर्वर्ण्यमयी चंचच्चौरा चाप
चमत्कृतिः । चक्रवर्तिवधूश्चक्रा चक्रांगा चक्रमोदि
नी॥चेतश्चरी चित्तवृत्तिश्चेता चेतनप्रदा ॥ चपियी
चंपकप्रीतिश्चंडी चंडालवासिनी ॥ चिरंजीवितदा
चित्ता तरुमूलनिवासिनी । छुरिकाछत्रमध्यस्था
छिद्राछेदकरी छिदा । छुच्छुंदरी पलप्रातिंछुदरी
भनिभस्वना ॥ छलिनी छलवच्छिन्ना छिटिका छे
कक्रुत्तथा ॥ छद्मिनी छांदसी छायाछायाकृच्छ्रा
दिरित्यपि ॥ जया च जयदा जातिजृंभिनी जामला

प्र०
८०

युता ॥ जया पुष्पप्रिया जाया जाप्यजाप्यजगज्ज
निः ॥ जंबूप्रिया जयस्था च जंगमा जंगमप्रिया ॥
जंतुजंतुप्रधाना च जरत्कर्णा जरद्गवा ॥ जाताप्रि
या जीतनस्था जीमूतसदृशच्छविः ॥ जन्याजन
हिता जाया जंभजंभिलशालिनी ॥ जवदा जवव
द्वाहा जमानीज्वरहा ज्वरी ॥ झंझा नीलमयी झ
झाझणत्कारकराचला ॥ झिंटीशा झस्यकृतझंपा
यमत्रासनिवारिणी ॥ टंकारस्था टंकधरा टंका
राकारणाटसी ॥ ठकुराठीत्कृतिश्चैव ठिंठीरवस
नावृता । ठंठानीलमयी ठंठाठणत्कारकराठसा॥

डाकिनी डामरा चैव डिंडिमध्वनिनादिनी । ढक्का प्रियस्वनाढक्का तपिनी तापिनी तथा ॥ तरुणी तुंदिला तुंदा तामसी च तपःप्रिया । ताम्रा ताम्रांबरा तालीतालीदलविभूषणी ॥ तुरंगा त्वरिता तोता तोतलातादिनी तुला । तापत्रयहरा तारा तालकेशी तमालिनी । तमालदलवच्छाया तालस्वनवती तमी ॥ तामसी च तमिस्रा च तीव्रा तीव्रपराक्रमा । तटस्थ्यागिलतैलाक्ता तारिणी तपनद्युतिः । तिलोत्तमतिलकक्तृतारकादेशशेखरा । तिलपुष्पा प्रिया तारा तारकेशकुटुंबिनी ॥ स्थाणुपत्नी स्थितिकरी स्थलस्था

५० स्थलवर्द्धिनी॥ स्थितिस्स्थैर्या स्थविष्ठा च स्थावतिः
५१ स्थूलविग्रहा । दंतिनी दंडिनी दीनां दरिद्रा दीनव
त्सला । देवी देववधूर्दैत्यदमिनी दंतभूषणा ॥ दया
वती दमवती दमदा दाडिमस्तनी ॥ दंदशूकनिभा
दैत्यदारिणी देवताननना ॥ दोलाक्रीडादलायुश्च दं
पती देवतामयी ॥ दशादीपस्थिता दोषा दोषहा
दोषकारिणी । दुर्गा दुर्गार्त्तिशमनी दुर्गमा दुर्गवासि
नी ॥ दुर्गंधनाशिनी दुःस्था दुःस्वप्नशमकारिणी ॥
दुर्वारा दुंदुभिध्वाना दूरगा दूरवासिनी ॥ दरदा द
रहा दात्री दयादा दुहिता दशा ॥ धुरंधरा धुरीणा च

धौरेयी धनदायिनी ॥ धीराधीराधरित्री च धर्मदा धीरमानसा । धनुर्धरा च धमिनी धूर्त्ताधूर्त्तपरिग्रहा धूमवर्णा धूमपाना धूमला धूममोदिनी॥नलिनीनं दनीरंदानंदिनीनंदबालिका । नवीनानर्मदा नर्मी नेमिर्नियमनिश्चया ॥ निर्मलानिगमाचारा निम्न गानग्निकानिम्निः ॥ नाला निरंतरा निघ्नी निर्लोपा निर्गुणा नतिः ॥ नीलग्रीवानिरीहा च निरंजनजनी नवी ॥ नवनीतप्रियानारीनरकार्णवतारिणी ॥ नारायणीनिराकारानिपुणानिपुणप्रिया ॥ निशानि द्रानरेंद्रस्थानमितानमितापि च ॥ निर्गुंडिकाचनि

प्र० ५२

गुंडा निर्मांसा नासिकाभिधा ॥ पताकिनी पताका च पलप्रीतियशस्विनी ॥ पीनापीनस्तनापत्नीपवनाशनशायिनी ॥ परापराकलापाकापाककृत्यरतिप्रिया। पवनस्था सुपवनातापसी प्रीतिवर्द्धिनी। पशुवृद्धिकरीपुष्टिः पोषणीपुष्पवर्द्धिनी। पुष्पिणी पुस्तककरा। पुन्नागतलवासिनी ॥ पुरंदरप्रिया प्रीतिः पुरमार्गनिवासिनी ॥ पेशापाशकरापाशबंधहापांशुलापशुः ॥ पटपटाशा परशुधारिणी काशिनी तथा ॥ पापघ्नी पतिपत्नी च पतिताऽपतितापि च ॥ पिशाची च पिशाचघ्नी पिशिताशन

तोषिता ॥ पानदापानपात्रा चपानदानकरोद्यता ॥
पेषाप्रसिद्धिः पीयूषा पूर्णा पूर्णमनोरथा ॥ पतद्ग
र्भा पतद्गात्रा पौनःपुन्यपिवापुरा ॥ पंकिलापंकम
ग्नाचपामीपापंजरस्थिता ॥ पंचमा पंचयामाच पंच
तापंचमप्रिया ॥ पंचमुद्रापुंडरीकापिंगलापिंगलो
चना ॥ प्रियंगुमंजरी पिंडी पंडिता पांडुरप्रभा ॥
प्रेतासनाप्रियालुस्थापांडुघ्नी पीतसापहा ॥ फलि
नी फलदात्रीच फलश्रीफणिभूषणा ॥ फूत्कारका
रिणीस्फारा फुल्लफुल्लांवुजासना ॥ फिरंगहा स्फी
तमतिः स्फितिः स्फीतिकरीतथा ॥ वनमाया

प्र० ५३

बलारातिर्बलिनीबलवर्द्धिनी ॥ वेणुवाद्या वनचरीवी रेवीजनयीअपि ॥ विद्याविद्याप्रदाविद्या बोधिनी वेद दायिनी ॥ बुधमाताच बुद्धाच वनमालावती वरा ॥ वरदावारुणीवीणावीणावादनतत्परा ॥ विनोदिनीविनोदस्थावैष्णवीविष्णुवल्लभा ॥ विद्यावैद्यचिकित्साचविवशाविश्वविश्रुता ॥ वितंद्राविह्वलावेलाविरावा विरतिज्वरा ॥ विविधार्ककरावीरा बिंबोष्ठी बिंबवत्सला ॥ विंध्यस्थावारवन्द्याच वरीयानपराचवित् ॥ वेदांतवेद्यावैद्याच वेदस्यविजयप्रदा ॥ विरोधवार्धिनी वन्ध्या वन्ध्याबन्धनि

वारिणी ॥ भयिनी भगमालाच भवानीभयभावि
नी ॥ भीमाभीमाननाभैमीभंगुरा भीमदर्शना ॥
भिल्लीभल्लधराभीरू भेरुंडीभीभयापहा ॥ भग
सर्पिण्यपिभगा भगरूपा भगालया ॥ भगासना
भगामोदा भेरीभंकाररंजिनी ॥ भीषणाभी
षणारावा भगवत्यपिभूषणा ॥ भारद्वाजीभोग
दात्री भवघ्नीभूतिभूषणा ॥ भूतिदा भूमिदात्री
चभूपतित्वप्रदायिनी ॥ भ्रमरी भ्रामरी नीला
भूपालमुकुटस्थिता ॥ मता मनोहरमना मानि
नीमोहिनीमही ॥ महालक्ष्मीर्मदक्षीबा मदीय

मदिलालया ॥ मदोद्धता मदंगस्था माधवीमधु
मंदिनी ॥ मेधामेधकरीमेध्या मध्यामध्यवय
स्थिता ॥ मद्यपा मांसला मत्स्यमोदिनी मैथुनो
द्धता ॥ मुद्रा मुद्रावती माता मायामहिममन्दि
रा ॥ महामायामहाविद्या महामारी महेश्वरी ॥
महादेववधूर्मान्या मधुरा वीरमण्डला ॥ मेदस्विनी
मीलदश्रीर्महिषासुरमर्दिनी ॥ मंडपस्था म
ठस्थाच मदिरागमगर्विता ॥ मोक्षदा मुंडमाला
च मालामालाविलासिनी ॥ मातंगिनीच मातं
गी मतंगतनयापि च ॥ मधुस्रवा मधुरसा मधूक

कुसुंमप्रिया ॥ यामिनीयामिनीनाथभूषायावक
रंजिता ॥ यवांकुरप्रियामाया यवनीयवनाधिपा ॥
यमघ्नीयमकन्याचयजमानस्वरूपिणी ॥ यज्ञाय
ज्वायजुर्यज्वायशोनिकरकारिणी ॥ यज्ञसूत्रप्रदा
ज्येष्ठायज्ञकर्मकरीतथा ॥ यशस्विनीयकारस्थायूप
स्तंभनिवासिनी ॥ रंजिताराजपत्नीचरमारेखारवे
रणी ॥ रजोवतीरजश्चित्रारजनीरजनीपतिः ॥ रा
गिनीराज्यनीराज्याराज्यदा राज्यवर्धिनी ॥ राज
न्वती राजनीतिस्तथा रजतवासिनी ॥ रमणी रम
णीया च रामा रामावतीरती ॥ रेतोवतीरतोत्साहा

रोगहृद्रोगकारिणी ॥ रंगारंगवतीरागारागज्ञारागकृ
द्रणा ॥ रंजिकारंजिकारंजारंजिनीरक्तलोचना ॥ र
क्तचर्मधरारंजारक्तस्थारक्तवादिनी ॥ रंभारंभफल
प्रीतीरंभोरूराघवप्रिया ॥ रंगभृद्रंगमधुररोदसीरोद
सीग्रहा । रोधकृद्रोधहंत्रीचरोगभृद्रोगशायिनी ॥
वंदीबंदिस्तुताबंधबंधूककुसुमाधरा ॥ वंदीतावं
दितामाताविंदुरावेंदवीविधा ॥ विंकीविंकपलाविंका
विंकस्थाविंकवत्सला ॥ वदिर्विलग्नाविप्राचविधि
विंधिकरीविधा ॥ शंखिनीशंखवलयाशंखमालाव
तीशमी ॥ शंखपात्राशनीशंखाशंखाशंखगलाश

शी ॥ शंवीशरावतीश्यामाश्यामांगीश्यामलोचना॥
श्मशानस्था श्मशाना च श्मशानस्थलभूषणा ॥
शमदाशमहंत्रीचशाकिनीशंकुशेखरा ॥ शांतिशां
तिप्रदाशेषाशेषस्थाशेषदायिनी ॥ शेमुषीशोषिणी
शीरीशौरिः शौर्याशराशिरिः ॥ शापहाशापहानी
शशांपाशपथदायिनी ॥ श्रृंगिणीश्रृंगपलभुक्शंकरी
शंकरीचया ॥ शंकाशंकापहासंस्थाशाश्वतीशीत
लाशिवा ॥ शिवस्थाशवभुक्तावाशावनर्णाशिवोदरी॥
शायिनीशावशयना शिंशपाशिशुपालिनी ॥
शवकुंडलिनीशैवाशंकराशिशिराशिरा ॥ शव

कांचीशवश्रीकाशवमालाशवाकृतिः ॥ शयनीशं
कुवाशक्तिः शंतनुः शीलदायिनी ॥ सिंधुः सरस्व
तीसिंधुः सुंदरीसुंदरानना ॥ साधुः सिद्धिः सिद्धि
दात्रीसिद्धासिद्धसरस्वती ॥ संततिःसंपदासंपत्संवि
त्सरतिदायिनी ॥ सपत्नीसरसासारासरस्वतिकरी
स्वधा॥सरःसमा समानाचा समाराध्या समस्तदा ॥
समिद्धासमदासंमासंमोहा समदर्शना ॥ समितिः
समिधासीमासवित्रीसविधासती ॥ सवतासवनादा
रासावनासमरासमी ॥ सिमिरासततासाध्वी
सध्रीचिंत्यसहायिनी ॥ हंसीहंसगतिर्हंसाहंसो

ज्ज्वलनिचोलयुक् ॥ हलिनीहलदाहालाहरश्री हरवल्लभा ॥ हेलाहेलावतीहेषाह्रेषस्थाह्रेषवर्द्धिनी ॥ हंताहंतिर्हताहत्याहाहंततपहारिणी ॥ हंकारीहंतहृद्धंकाहीहाहाताहताहता ॥ हेमप्रदाहंसवतीहारीहातरिसंमता ॥ होरीहोत्रीहोलिकाचहोमाहोमोहविर्हरिः ॥ हारिणीहरिणीनेत्राहिमाचलनिवासिनी ॥ लंबोदरी लंबकर्णालंबिकालंबविग्रहा ॥ लीलालोलावतीलोलाललनीलाललिताल ता ॥ ललामलोचनालोच्यलोलाक्षीलक्ष्मणाललला ॥ लंपतीलुंपतीलंपालोपामुद्राललंतिनी ॥ लंतिका

प्र०
५७

लंबिकालंम्बालघिमालघुमध्यमा ॥ लघीयसी लघुदयीलूतालूतनिवारिणी ॥ लोमभृल्लोमलोम्राचलुलुतीलुलुसंयती ॥ लुलायस्थाचलहरी लंकापुरपुरंदरी ॥ लक्ष्मीर्लक्ष्मीप्रदालक्ष्म्यालक्षबलमतिप्रदा ॥ क्षुण्णाक्षुपाक्षणाक्षीणाक्षमा क्षांतिः क्षणावती ॥ क्षामाक्षामोदरीक्षीमाक्षौमभृत्क्षत्रियांगना ॥ क्षया क्षयाकरी क्षीराक्षीरदाक्षीरसागरा ॥ क्षेमंकरीक्षयकरीक्षयतत्क्षणदाक्षतिः ॥ क्षुरंती क्षुद्रिका क्षुद्रा क्षुत्क्षामाक्षरपातका ॥१०००॥ मातुः सहस्रनामेदं प्रत्यंगिर्याः प्रदायकम् ॥ यः पठे

त्प्रयतो नित्यं स एव स्यान्महेश्वरः ॥ अनाचांतः
पठेन्नित्यं दरिद्रो धनदो भवेत् ॥ मूकः स्याद्वाक्प
तिर्देवि रोगी नीरोगतां व्रजेत् ॥ अपुत्रः पुत्रमाप्नो
ति त्रिषु लोकेषु विश्रुतम्॥वंध्यापि सूते तनयान्
गावश्च बहुदुग्धदाः ॥ राजानः पादनम्राः स्युस्तस्य
दासा इव स्फुटाः॥अरयः संक्षयं यांति मनसा संस्मृ
ता अपि॥ दर्शनादेव तायंते नरा नार्योऽपि तद्वशाः॥
कर्ता हन्तात्वयं वीरो जायते नात्र संशयः ॥ यं यं
कामयते कामं तं तं प्राप्नोति निश्चितम् ॥दुरितं न च
तस्यास्ते नास्ति शोकः कदाचन ॥ चतुष्पथेऽर्द्ध

रात्रे च यः पठेत्साधकोत्तमः ॥ एकाकी निर्भयो
धीरो दशावर्त्त स्तवोत्तमम् ॥ मनसा चिंतितं कार्यं
तस्य सिद्धिर्न संशयः ॥ विना सहस्रनाम्ना यो
जपेन्मंत्रं कदाचन ॥ न सिद्धो जायते तस्य मंत्रः
कल्पशतैरपि ॥ कुजवारे श्मशाने च मध्याह्ने यो
जपेदथ ॥ शतावर्त्या सर्जयेत कर्ता हर्ता नृणा
मिह ॥ रोगार्तधोंनिशायांते पठितांमसि संस्थि
तः ॥ सद्यो नीरोगतामेति यदि स्यान्निर्भयस्त
दा ॥ अर्द्धरात्रे श्मशाने वा शनिवारे जपेन्मनुम्
॥ अष्टोत्तरसहस्रं तद्दशवारं जपेत्ततः ॥ सहस्रनाम

चैतद्धि तदा याति स्वयं शिवा ॥ महापवनरूपेण घोरगोमायुनादिनी ॥ तदा यदि न भीतिः स्यात्त तो द्रोहीति वा भवेत्। तदा पशुबलिं दद्यात्स्वयं गृ ह्णाति चंडिका ॥ यथेष्टं च वरं दत्त्वा याति प्रत्यंगि रा शिवा ॥ रोचनागुरुकस्तूरीकर्पूरमदचंदनः ॥ कुं कुमप्रथमाभ्यां तु लिखितं भूर्जपत्रके ॥ शुभनक्ष त्रयोगे तु कृत्रिमाकृतसत्क्रियः ॥ कृतसंपातनासि द्धिर्धारयेद्दक्षिणे करे ॥ सहस्रनामस्वर्णस्थं कंठे वापि जितेंद्रियः ॥ तदा यंत्रे नमेन्मंत्री क्रुद्धा संम्रि यते नरः ॥ यस्मै ददाति यः स्वस्ति स भवद्धनदो

यमः ॥ दुष्टश्वापदजंतूनां न भीः कुत्रापि जायते ॥
बालकानामिमां रक्षां गर्भिणीनामपि ध्रुवम् ॥ मोह
नं स्तंभनाकर्षमारणोच्चाटनानि च ॥ यंत्रधारणतो
नूनं जायंते साधकस्य तु ॥ नीलवस्त्रे विलिखितं
ध्वजायां यदि तिष्ठति ॥ तदा नष्टा भवत्येव प्रचंडा
परिवाहिनी ॥ एतज्जप्तं महाभस्म ललाटे यदि धा
रयेत ॥ तद्दर्शनत एव स्युः प्राणिनस्तस्य किंक
राः ॥ राजपत्न्योऽपि वशगाः किमन्याः परयोषि
तः ॥ एतज्जप्तं पिबेत्तोयं मासैकेन महाकविः ॥ पं
डितश्च महादीक्षो जायते नात्र संशयः ॥ शक्तिं संपू

ज्य देवेशि पठेत्स्तोत्रं वरं शुभम् ॥ इह लोके सुख
मुक्त्वा परत्र त्रिदिवं व्रजेत् ॥ इतिनामसहस्रं तु प्रत्यं
गिरामनोहरम् ॥ गोप्यं गुप्ततमं लोके गोपनीयं स्व
योनिवत् ॥ इति श्रीरुद्रयामले तंत्रे दशविद्यारहस्ये
प्रत्यंगिरासहस्रनाम संपूर्णम् ॥ ॐ अस्य श्रीप्रत्यंगि
रास्तोत्रमंत्रस्य महादेव ऋषिः ॥ अनुष्टुप् छंदः ॥
प्रत्यंगिरा देवता ह्रींबीजं स्वाहा शक्तिः ॥ स्फें की
लकम् ॥ ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ मंद
रस्थं सुखासीनं भगवंतं महेश्वरम् ॥ समुपागम्य चर
णौ पार्वती परिपृच्छति ॥ पार्वत्युवाच ॥ धारिणी प

प्र०
६०

रमा विद्या प्रत्यंगिरा महोदया। नरनारीहितार्थाय बालानां रक्षणाय च॥ राज्ञां मांडलिकानां च दीनानांच महेश्वर विदुषां च द्विजातीनां विशेषेणार्थसाधिनी॥ उत्कृष्टा परमा देवी प्रत्यंगिरा महोत्तमा॥ महाभयेषु घोरेषु विद्युदग्निभयेषु च॥ व्याघ्रदंष्ट्राकराघाते नदीनदसमुद्रके॥ अभिचारेषु सर्वेषु संग्रामे राजपीडिते॥ सौभाग्यजननी नित्यं नृणां वश्यकरी तथा॥ यां विद्यां भोः सुरश्रेष्ठ कथयस्व मम प्रभो॥ पठिता पाठिता देवी सर्वसिद्धिकरी सदा॥ यस्यांगस्था महाविद्या प्रत्यंगिरा शिवोदिता॥

तां विद्यां भोः सुरेशान कथयस्व मयि प्रभो ॥ श्रीभैरव उवाच ॥ साधु साधु महाभागे जंतूनां हितकारिणी ॥ वचनांते सुरां सिद्धिं कथयामि न संशयः ॥ देवी प्रत्यंगिरा विद्या दुष्टग्रहाविनाशिनी ॥ मर्दिनी सर्वदुष्टानां सर्वपापप्रमोचिनी ॥ स्त्रीबालप्रभृतीनां च जनानां हितंकाम्यया ॥ सौभाग्यजननी देवी बलपुष्टिकरी तथा ॥ चतुष्पथेषु गोष्ठेषु तथा गोष्ठवनेषु च ॥ श्मशाने दुर्गमे घोरे संग्रामे शत्रुसंकटे ॥ गुह्येप्यशुचिस्थानेषु संग्रामे शत्रुसंकटे ॥ राजद्वारे च दुर्भिक्षे महाभय उपस्थिते ॥ पठिता पा

ठिता देवी सर्वसिद्धिकरी स्मृता ॥ यस्यात्मस्था
महाविद्या प्रत्यंगिरा सुभाषिता ॥ सिद्धा सुसिद्धा
सानित्यंविधेयं परमा स्मृता ॥ श्रीमता घोररूपे
ण भाषिता घोररूपिणी ॥ यस्यांगस्था महावि
द्या विचिंत्या धारिता नरैः ॥ लिखिता च करे कंठे
बाहौ शिरसि धारयेत । विमुच्यते महाघोरे मृत्युरू
पे दुरासदे ॥ दुष्टसत्वग्रहा देवयक्षरक्षादयस्तथा ॥
पीडां तस्य न कुर्वंति ये चान्ये पीडका ग्रहाः।मंत्राबा
ह्याभिचारे नो प्रवर्तंते कदाचन॥नित्यं च धार्यमाण
स्य अमृतत्वं च कल्पयेत् ॥ यो धारयेद्योगयुक्त

स्तस्य रक्षा भवेत्सदा ॥ सिद्धार्था सिद्धिदा नित्यं
विद्येयं परमा स्मृता ॥ प्रत्यंगिराक्षरा प्रोक्ता रिंपुह
न्यान्न संशयः। हरिचंदनमिश्रेण रोचनाकुंकुमेन च॥
लिखित्वा भूर्जपत्रे तु धारणीया सदा नृभिः ॥ पुष्पै
र्धूपैर्विचित्रैश्च बल्युपाहारपूजनैः । पूजयित्वा यथा
न्यायं शीतकुम्भेन वेष्टयेत् ॥ धारयेद्यदिमान् मंत्रान्
लिखितान् रिपुनाशकाः । विलयं यांति रिपवः प्रत्यं
गिराविधारणात् ॥ पूजयित्वा यथान्यायं सितसूत्रेण
वेष्टयेत् । धारयेद्य इमां विद्यां निश्चितं रिपुनाशनीम् ।
रिपवो विलयं यांति प्रत्यंगिराप्रधारणात् । यं यं स्पृ

शति हस्तेन यं यं स्वादति जिह्वया॥अमृतत्वं भवेत्त
स्य मृत्युर्नास्ति कदाचन ॥ कर्मणो यो जपेद्वा
स्तु कृत्रिमं दारुणं सदा ॥ भक्षितं जरयत्याशु तर
सा तस्य सुव्रते ॥ तथास्योऽन्ययग्रमानायां जीर्यती
नात्र संशयः । मंत्रराजोदयं देवि सर्वसिद्धिकरः स्मृ
तः ॥ सर्वमंत्रविनाशी च गोलं गुह्यतरं मया ॥ सर्ववि
द्याहरा विद्या प्रत्यंगिरा महेश्वरी ॥ गोलकस्य
प्रभावेन प्रत्यंगिराप्रभावतः ॥ त्रिपुरश्च मया दग्ध
इमां विद्यां च बिभ्रता ॥ निर्जिताश्चासुराः सर्वे देवै
र्विद्याभिमानतः ॥ गोलकं संप्रवक्ष्यामि भेषज्यानि

च सुव्रते॥कांता मदनकं चव रोचना कुंकुमं तथा ॥
अरुष्करं शिखारिष्टं सिद्धार्था मालती तथा ॥ एतद्द्र
व्यगणं भद्रे गोलगर्भेति धापयेत ॥ धारयेत्सततंमंत्रं
साधको मंत्रवित्सदा । गोलकं केलिकं कृत्वा भेष
जाय च सुव्रतः॥आयुष्करं सुखकरंसिद्धार्था मालती
तथा ॥ संभृतं धारयेन्मंत्री साधको मंत्रवित्सदा ॥
अभिधां संप्रवक्ष्यामि प्रत्यंगिरासुभाषिताम् ॥ दि
व्यैर्मंत्रपदैश्चित्रैः सुखोपायैः सुखप्रदैः ॥ पाठे रक्षा
विधानेन मंत्रराजः प्रकीर्तितः ॥ अथातो मंत्रपा
दानि संप्रवक्ष्यामि यत्नतः ॥ ॐ अस्य श्रीप्रत्यं

गिरामंत्रस्य ॥ श्रीभगवान् भैरवशंकर ऋषिः अ
नुष्टुबादि नानाछंदांसि ॥ श्रीजगन्मातात्रत्यंगि
रादेवता ॐ बीजं ॥ जुंशक्तिः सः कीलकम् ॥ म
म सर्वार्थसिद्ध्यर्थे जपे विनियोगः ॐ नमः सहस्र
सूर्येक्षणाय महासुखाय अनादिरूपाय पुरुहस्ताय
महामखाय महाव्याघ्रायिने महाघोरातिघोराय
महाप्रभावं दर्शय ॐ हिलिहिलि ॐ मिलिमिलि
ॐ हरि हरि ॐ विद्युज्जिह्वे ज्वल ज्वल प्रज्वल प्र
ज्वल बंध बंध मथ मथ प्रमथ प्रमथ प्रध्वंसय प्र
ध्वंसय शमय शमय पिब पिब ग्रस ग्रस नाशय

नाशय वद वद द्रावय द्रावय विद्रावय विद्रावय छिंधि छिंधि कृंतय कृंतय भक्षय भक्षय त्रासय त्रासय ताडय ताडय विदारय विदारय भ्रामय भ्रामय कुलं कुलं भुंज भुंज भंज भंज चुंब चुंब दह दह गर्ज गर्ज स्फोटय स्फोटय चुरय चुरय उत्सादय उत्सादय मोहय मोहय उन्मूलय उन्मूलय संकोचय संकोचय आवेशय आवेशय मम विपदं नाशय नाशय विषं नाशय नाशय शत्रूंस्त्रासय त्रासय विदारय विदारय ममरक्ष त्वं ॥ अतः परं स्वशरीरनामोच्चार्य ॥ ॐ आद्याक्षरमहायोगपु

प्र०
६४

रुषरसवत्यांमां धारकं सपरिवारकं रक्ष रक्ष महामे
घौघघातिके महामेघौघघातिके महामेघौघादि
सवंर्त्तकसंवर्त्तके विद्युद्दातविद्युत्क्रांते विद्युदतक
कपर्द्दिनिदिव्यकनकांभोरुहंकपर्द्दिनिदिविकनकांभो
रुहंविकचमुंडमालाधारिणि शितिकंठव्याघ्राजिनि
कुक्कुटि परमेश्वरप्रिये छिंधि छिंधि विद्रा
वय विद्रावय विदारय विदारय देवपिशाचनागा
रुण्डकिन्नरविद्याधरगणगंधर्वयक्षराक्षसलोकपालानु
ग्रहान्स्तंभयनाकलोकपालांश्च हन हन अत्रस्थ
ले शत्रुनामोच्चारं कृत्वा ये मम शत्रवस्तान् हनय

हनय मम शत्रवस्तान्निकृंतय निकृंतय ये च सदा
मम विद्यायामविधायामविद्याकर्म कुर्वंति तेषां
विद्यां स्तंभय स्तंभय कीलय कीलय घातय घातय
ॐ विश्वमूर्त्तये महातेजसे २ ॐ जुंसः ॥ मम शत्रणां
मुखं स्तंभय स्तंभय ॥ ॐ जुंसः॥ मम शत्रूणां गुह्यं
स्तंभय स्तंभय ॥ ॐ जुंसः मम शत्रूणां विद्यां स्तंभ
य स्तंभय ॥ ॐ जुंसः मम शत्रूणां हस्तौ स्तंभयस्तं
भय ॥ ॐ जुंसः मम शत्रूणां पादौ गुह्यखगध्वनि
मर्माणि स्तंभय स्तंभय ॥ ॐ जुंसः ॥ मम शत्रूणां

प्र०
६९

पादौ स्तंभय स्तंभय ॥ ॐ जुंसः ॥ मम शत्रूणां
विश्वस्य स्तंभय स्तंभय ॥ ॐ जुंसः ॥ मम शत्रू
णां नेत्रयोस्तंभय स्तंभय ॥ ॐ जुंसः ॥ मम शत्रू
णां श्रोत्रयोस्तंभय स्तंभय ॥ ॐ जुंसः ॥ मम शत्रू
णां गृहांत्रकुटुंबं स्तंभय स्तंभय स्थानं कीलय की
लय मुंडं कीलय कीलय देहं कीलय कीलय नाभिं
कीलय कीलय मंडलं कीलय कीलय सर्वदेहं कील
य कीलय ॐसर्वसिद्धिभागे महाभागस्य स्वशरीर
नामोच्चारं कृत्वा मम धारकस्य सपरिवारकस्य

शांतिं कुरु कुरु सपरिवारस्य रक्षां कुरु कुरु स्वाहा।
ॐ ॐ ॐ रं रं रं हूं हूं हूं फट् स्वाहा ॥ ॐ ॐ
ॐ ॐ ॐ यं यं यं यं यं रं रं रं रं रं लं लं
लं लं लं वं फट् स्वाहा ॥ ॐ ठः ॐ ठः ॐ
ठः ॐ हूं फट् ॐ प्रत्यंगिरे मम धारकस्य सपरि
वारकस्य रक्ष रक्ष ॐ यः यः ॐ ॐ ॐ ह्रीं फट्
स्वाहां ॥ ॐ मम धारकस्य शत्रून् हनहन धम
धम सर्वदुष्टांस्त्रासय त्रासय ॐ ॐ ॐ ह्रां ह्रां
ह्रां ह्रष्टांकरालीममतन्त्रविषशस्त्राभिघातं सर्वोपद्रवा

दि येन कृतं कारितं कारयति कारयिष्यति वा तान्सर्वान्न् हन हन पच पच प्रत्यंगिरे रक्ष रक्ष त्वं मां धारकं सपरिवारकं रक्ष रक्ष स्वाहा ॥ विद्यानामुत्तमा विद्या पठिता पाठिता नरैः ॥ लिखिता च करे कंठे बाहौ शिरसि धारयेत् ॥ मुच्यते सर्वपापेभ्यो नाल्पमृत्युः कदाचन ॥ ग्रहा यक्षास्तथा सिद्धा देवराक्षसपन्नगाः ॥ तस्य पीडां न कुर्वंति देवि भूम्यंतरिक्षगाः॥ प्राप्नोति वसुधां सर्वां रिपुहस्तगतां श्रियम्॥वशास्तिष्ठंति तत्रैव

शत्रवः प्राणहारकाः ॥ भवंति वशगास्तस्य सौंद
र्यप्रियदर्शनात् ॥ अभ्यासतां याति विद्याः सि
द्धिदेव्याः प्रभावतः ॥ चराचरमिदं सर्वं सशैलवन
काननम् ॥ नरनारीसमाकीर्णं साधकस्य न संशयः।
सर्वं च वशतां याति तपमानस्य नित्यशः ॥
अथ नवशक्तिं स्मृत्वा शत्रून्मारयते क्षणात् ॥
इदं सत्यं मया प्रोक्तं नान्यथा गिरिनंदिनि॥इति
श्रीरुद्रयामले तंत्रे ईश्वरपार्वतीसंवादे प्रत्यंगि
रास्तोत्रं समाप्तम् ॥ श्रीरस्तु आयुष्यमस्तु ॥

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,™

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

इति

प्रत्यंगिरापंचांगम्

समाप्तम् ।